म् । मधुनो नवत्वविशेषणेन रुच्यातिशयो मादकत्वातिशय
। आमोदाना मितिबहुवचनेन पद्मकुवलयतत्तन्मधुगज दानां
नोगन्धा विवक्षिताः अत्र प्रस्तुते मारुतवृत्तान्ते वर्ण्यमाने अ
प्रेमार्पित मधुपानमत्त दक्षिण नायकप्रतीते स्समासोक्तिः
ना महमहमिकादेशं प्रति आपिबन् घूर्णमानः स्विन्नः इतिवि
हेतुत्वात् काव्यलिङ्गम् ॥ गन्धोगन्धक आमोदे लेशे सम्ब
सएवद्रव्यवचनो बहुत्वे पुंसिचस्मृतः इतिकोशः । पद्मिनी स्त्री
{ सरस्यामम्बुजेपिचेतिविश्वः मधुमाध्वीकमद्ययोरित्यमरः । म
ग्रमरः । विमर्दोत्थे परिमळो गन्धेजनमनोहरे । आमोदस्सो
ग्रमरः । अतिनिर्हारी अतिदूरव्यापीत्यर्थः । अहमहमितिश
ति अहमहमिकाक्रिया । अहमहमिकातुसास्यात् परस्परं यो
: इत्यमरः. (१

बन्धुजीवद्वारापि मारुतस्त्वां सेविष्यत इत्याह पर्याप्तमिति
तुल्यात् समुदयात् उन्मेषात् तुल्यकालोन्मिषितत्वादित्यर्थः :

योः शारदत्वादितिभावः बन्धवः स्वजनभूताः बन्धुजीवाः
बन्धुर्जीवः येषांते इति व्युत्पत्या बन्धुष्वतिमात्र प्रीतिमन्त इ
पवनेन मारुतेन चलितैः नुन्नैः परागैः पुष्परजोभिः तेतव
पूर्णां रज्यते अनेनेतिरागः अनुलेपनद्रव्यं अङ्गानां रागः तं
येयुः स्यानेयुक्तं - बन्धुत्वात् बन्धुजीवत्वाच्चेतिभावः । अङ्गर
नष्टि येन अङ्गरागेण अचलस्य हिमवत इत्यर्थः तनयायाः पुत्र
पादयोः चरणयोः लाक्षया अलक्तकरसेनेत्यर्थः अनुषक्तं स
मित्यर्थः अनेन शिवस्य पार्वतीपादपतनं व्यज्यते पुरविज
ञेतुः शिवस्येत्यर्थः अनेन तस्यमहान् उत्कर्षः सूचितः स्वर
स्थितायाः) गङ्गायाः फेनेन बुद्बुदाकार जलपरिणामविशेषे
पूर्णमण्डलीकृत मित्यर्थः चूडा शेखरभूतः यश्चन्द्रः तं बाल
अन्वेष्यसि अनुकरिष्यसि । अनुपूर्वकादिणः सादृश्यार्थकात
कर्तारिलृट् तस्य सादृश्यार्थकत्वंच तमन्वेत्यनुबध्नाति तच्छील
तस्यवानुकरोतीति शब्दास्साधर्म्यवाचकाः॥' इति दण्डिव
अन्विष्यसीतिपाठे अन्विष्यसि अनुसरिष्यसि तत्सदृशो भ
अनुपूर्वकात् गत्यर्थकात् दैवादिकादिष्यतेः वर्तमानसामी
प्येति कर्तरिलट् । अत्र बन्धु बन्धुजीवशब्दयोः अङ्गरागा
प्रायकत्वात् परिकर परिकराङ्कुरौ चूडाचन्द्रमन्वेष्यसीत्यत्र
तोपमेतिकोचित् तथाचदण्डी । सर्वपद्मप्रभासारः समाहृ
त्वदाननं विभातीति तामभूतोपमां विदुरिति ॥ उपमान
अभूतोपमेतिभावः ॥ बन्धुस्वस्वजनास्समाइति युक्तेर्हंसां
चामरः । यद्यपिडिण्डीरोऽब्धिकफःफेन इत्यमरकोशेन फे

सूक्ष्माकारै र्दिनकरकरैः कल्पितान्तश्शलाकाः
शारोपान्ता श्शतमखधनु श्शेषचित्रांशुकेन ।
ऊढाःपश्चा दुचितगतिना वायुनाराजहंस
च्छत्रायेरन्नभासि भवतश्शारदा वारिवाहाः ॥ ॥१

ातथापि तत्तुल्यत्वात् अन्यत्रापि प्रयुज्यते. (१
मारुतप्रेरितानां शारदमेघानां सेवाप्रकारमाह सूक्ष्मेति । हे
नेन छत्रोपचारार्हत्वंद्योतितम्) शरदिभवा : शारदाः (अ
ं द्योतितम्) वारीणि वहन्तीति वारिवाहाः (अनेनतापप
तितम्) सूक्ष्मः तनुः आकारः आकृतिः येषां तथोक्तैः
रः दिनस्यकरः दिनकरः सूर्यः तस्य करैः किरणैः कल्पि
ाः अन्तश्शलाकाः अंशुकधारणाय अन्तः कल्पनीयशला
क्तः (शलाकाछत्रकाष्ठी) अनेन शलाकानां भास्वरत्वं
तमखधनुषः इन्द्रचापस्य तन्नामकस्य कान्तिविशेषस्येत्यर्थः श
ा चित्रांशुकं नानावर्णवस्त्रंतेन (अत्र शेषशब्दः शरदिशैथि
नसूचकः) शारः कर्बुरवर्णः कृष्णरक्तसितरूप इतियावत् उपा
गः येषां तथोक्ताः । पश्चात् पृष्ठतः उचिता योग्या गतिः ग
ोक्तेन त्वद्गत्यनुरूपगतिनेत्यर्थः वायुनामारुतेन ऊढाः धृ
ाभसि अन्तरिक्षे भवतः तव छत्रायेरन् छत्राणीवाचरेयुः ।
करादेः शलाकादित्वेन रूपणात् रूपकालङ्कारः दिनकर
ः वैय्यधिकरण्येपि नद्याशेखरिणे दृशातिलकिन इत्यादा
छत्रायेरन्नित्यत्र उपमा साचरूपकोत्थापितेतिसङ्करः ॥ छत्र
र्थे कर्तुः क्यङ्सलोपश्चेति क्यङिसम्भावनायां कर्तरिलिङ्॥

द्रक्ष्यस्येवं प्रियसखसुखं लङ्घिताध्वासखीं ते
सीतांक्षेत्रे जनकनृपते रुत्थितांसीरकृष्टे ।
गोपायन्ती तनुमपिनिजां या कथंचिन्मदर्थं
भूमौलोके वहतिमहती मेकपत्नीसमाख्याम् ॥

स्याच्छबळेत्राच्य लिङ्ग इतिमेदिनी । कृष्णरक्तसितश्शार
न्तोच्च.

अथ गमनस्य अवान्तरप्रयोजनमाह द्रक्ष्यसीति । प्रियश्चा
तस्यसम्बुद्धिः हेप्रियसख प्रियमित्र अनेन अच्छलं मित्रभावेन
वलोकनमित्युक्त्या परदारावलोकनार्हत्वं सूचितं त्वं एवं उक्तप्र
अक्लेशं यथातथा लंघितः यापितः अध्वामार्गः येनतयोक्तस
सखीं वयस्यां सीरेण हलेन कृष्टेकर्षणं प्रापिते जनक इतिनृ
चेत्रे यज्ञियक्षेत्रे उत्थितां आविर्भूतां अनेन अयोनिजत्वं उ
तन्नाम्नीं (सीतालाङ्गलपद्धतिः तज्जातत्वात् तस्यास्तन्नामत्वं) द्र
लोकिष्यसे । गंगापतिव्रताचेतिद्वयं परमपावनं । यदेतत्तनुतेश्रे
स्मरणादिभिः इत्युक्त्या श्रेयस्करं तव तद्दर्शनं भविष्यतीत्यभि
स्तांविशिनष्टि । या सीतानिजां स्वकीयां तनुं मूर्तिमपि अ
ज्यरक्षे दात्मानमात्मनेत्युक्त्या स्वार्थमेव अवश्य रक्षणीयाम
मह्यं इदं मदर्थं मत्प्रीत्यर्थं यथा तथा नतुस्वार्थंकथञ्चित् म
नगोपायन्तीरक्षन्तीसती भूमौलोके भूलोके महतीं पूज्यां ए
स्यास्सा एकपत्नी पतिव्रतासेतिसमाख्यां कीर्तिं (सम्यक् आ
समाख्या) वहति धारयतीत्यर्थः। वहतियः परितः कनकस्थर
युवराजएव वहति श्रीवीररुद्रो धुरमित्यादाविव अत्रापिवहतिरे

प्रक्षीणां त्वद्विरहसमये जातहर्षामिदानीं
प्रत्यायास्य त्वनुनयशनैः पद्मिनींस्वादुवाचा ।
सातेतन्वी स्वनसुभगया स्यादितीहाभ्यनुज्ञाम्
मन्येकुर्या न्मधुकरगिरा मैथिलीसौहृदेन ॥

अत्र परस्मैपदेन तत्फलस्यापि भर्तृगामित्वं सूचितं वासोङ्गरा
रमपिवास्वकं भर्त्रर्थं धारयेद्यातु सास्त्रीज्ञेया पतिव्रतेत्युक्तं ः
ाः पुष्कलमितिभावः अत्र उत्थितामिति विशेषणस्य उत्तरार्ध
स्य विशेषणस्यच तद्दर्शनं श्रेयस्कर मित्यभिप्रायकतया परि
सखेत्यत्र राजाहस्साखिभ्य इतिसमासान्तष्टच् । गोपायन्तीत्य
त्वोः क्रियाया इतिवहनाक्रियां प्रतिहेतौ वर्तमानाद्धातोः लट
तश्चेतिङीप् नित्यंसपत्न्यादिष्विति पतिशब्दस्यनुकि ऋन्नेभ्यः
ालांगलपद्धतिर्वैदेहीस्वर्गगंगास्वितिमेदिनी । क्षेत्रं भार्याङ्गके
हयोनिषु इति रत्नमाला । यशःकीर्तिस्समाख्याचेत्यमरः.
एतावता संक्षेपेण हंसस्य दक्षिणदिग्गमने अतिशयं तत्र स
क्त्वा इष्टंहिविदुषांलोके समासव्यासधारण मित्युक्तरीत्या
स्तरेण वक्ष्यन् पूर्वोक्ते कमलसरसिस्थितायाः पद्मिन्याः राज
नुकूलदांपत्यमभिप्रयन् तयाऽभ्यनुज्ञातो गच्छेत्याह प्रक्षी
ं प्रियस्यतव विरहः वियोगः तस्यसमये काले वर्षास्वित्यर्थ
त्वेण क्षयं प्राप्तां इदानीं सांप्रतं शरदि त्वय्यागतेसतीतिभा
पन्नः हर्षः प्रमदः यस्याः तथाभूतां । एतेन आर्तार्तेमुदितेहृ
लेनाकृशा । मृतेम्रियेतयानारी सास्त्रीज्ञेया पतिव्रतेत्युक्त पातिव्र
नुपेक्ष्यत्वं द्योतितं पद्मिनीहिवर्षासुक्षीयते शरदिवर्धत इ

ानीं कमलिनीं स्त्रीविशेषञ्च प्रत्यायास्यन् प्रत्यागमिष्यन् सन्
ागमिष्यामीति निवेदयन्नित्यर्थः स्वाद्वयामधुरयावाचा गिराशं
सहसा तथासत्युद्वेगो भवेदितिभावः अनुनयसान्त्वय सा उ
ानीं तन्त्र्याः वीणातन्त्र्याः स्वनःध्वनिरिव सुभगया मधुरया
श्वनोतीतिकरः मधुनः करः मधुकरः तस्य भ्रमरस्य गिरावा
गां पद्मिनीसंबन्धित्वेन तेषांगीः पद्मिनीगीरेवेतिभावः अनेन
ो माधुर्यंव्यज्यते स्यादिति एवमेवभवत्विति तेतत्र कर्मणिष
स्मिन्कार्ये अभ्यनुज्ञां आभिमुख्येन अनुमतिं नत्वौदासीन्येन
ःया अप्यौत्सुक्यं सूचितं तत्रहेतुमाह मैथिल्यां सीतायां सौहृदे
पयेत्यर्थः कुर्यात् विरचयेत् मन्ये संभावये । वाक्यार्थः कर्म
यां लिङ् । नात्र अनुज्ञांकुर्यान्नवेति संशयितव्यं किन्तुमैथिल
र्यादेव अन्यत्रतु नकुर्यादेवेतिभावः 'तवहेतोर्विशालाक्षि नहि
ःयमिति' सीतांप्रति सरमोक्तिप्रकारेण सतीनां प्राणत्यागेनां
पकार प्रवृत्तिस्वाभाव्यादितिभावः॥ प्रत्यायास्यन्नित्यत्र ऌ
ातृप्रत्ययः सौहृदेनेत्यत्र शोभनं हृदयंयस्यास्सा सुहृदयाकारुणि
नेत्र तत्र सुहृदितिनिपातनात् तस्याः भावः सौहृदं हायनान्त
गेति सुहृदयशब्दादाणि तद्धितेष्वचामादेरितिवृद्धौ हृदयस्य हृ
ाहृद्वादेशः हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिस्तु ल
ोक्तयोः प्रतिपदोक्तस्यैवेति न्यायेन मित्रे निपातितस्य सुहृच्छ
ोध्यं अत्र प्रक्षीणां जातहर्षामिति विशेषणयोः अनुनयं प्रा
ताव्यलिङ्गं । पद्मिनीति विशेष्यस्य सौकुमार्यातिशयेन विरह
वाभिप्रायकत्वात् परिकराङ्कुरः । अयमपि पद्मिनीशब्द श्लेषम्

सार्धंकान्तैश्शबरसुदृशा मद्रिकुञ्जेषुरागा
दासीनानां क्षणमसमये दृश्यचन्द्रोदयश्रीः ।
उड्डीयेथा स्सरसिजवना द्दक्षिणाशानुसारी
पश्यन्दूरा त्प्रबलगरुतां पक्षिणांदत्तवर्त्मा ॥ ॥१६॥

ापित इतिसंकरः । तन्त्रीस्वनसुभगयेत्यत्रोपमा । अत्र रामभद्र
अनाहार्यसंभावनाया एव आचार्यैर्विवक्षिततया नोत्प्रेक्षावकाश
I. (१५)
अस्मात् सरसिजवनादुत्पतेरित्याह सार्धमिति । कान्तैः प्रियैःसार्ध
ीणां गिरीणां कुञ्जेषु लता गृहेषु रागात् प्रियसंगबुद्धेः संभोग
ोषादितियावत् रागस्तत्संगबुद्धिस्यादित्युक्तेः आसीनानां उप
ां शोभनेदृशौ यासांताः अनेन सौन्दर्यं व्यज्यते अंग प्रत्यंग
संन्निवेशोयथोचितः सुस्निग्धसन्धिबन्धस्यात् तत्सौन्दर्यमिति
लक्षणात् शबर्यश्चता स्सुदृशश्च तासां म्लेच्छजाति विशेषस्त्रीणा
कर्तरिषष्ठी असमये अकाले चन्द्रोदयानर्हकाल इत्यर्थः क्षण
नमित्यर्थः दृश्या दर्शनयोग्या चन्द्रोदयस्य इन्दूदयस्य उद्यच्च
ः श्रीः शोभायस्मिन् तथाभूतस्सन् हंसगमनावस्याकालिव
धः क्षणदृष्यत्वं बोध्यं शबरसुदृशामित्यस्य दृश्येति समासैकदेश
ाय प्रतियोगिपदादन्यत् यदन्यत्कारकादपि । वृत्तशब्दैव
तस्यान्वय इष्यत इत्युक्त्याकारकस्यान्वयेदोषाभावात् अनुस
नुसारी दक्षिणाशां दक्षिणादिशं अनुसारी तथाभूतः दूरात् दृ
वनोयं पश्यन् मार्गं विलोकयन् प्रकृष्टं बलं शक्तिः येषां तादृशा
पत्ताः येषां तादृशानां पक्षिणां भेरुण्डादीनां पतत्रिणां द

वितीर्ण वर्त्ममार्गः येनतथाभूतश्चसन् आत्मनः स्वस्त्ययनार्थं ।
विघातार्थंचेतिभावः सरसिजवनात् अस्मात्कमलवनात् उ
आकाशमुत्पतेरित्यर्थः षष्ठस्तुपन्था हंसानां वैनतेयगतिः परेत्यु
डेतर पक्ष्यपेक्षया हंसस्य ऊर्ध्वगामितया तत्पर्यन्तोत्पतना
प्रबलपक्षिणां मार्गंददत्सन् उत्पतेरितिभावः अत्रहंसे चन्द्रोदयां
पाल्लिदर्शनाभेदः पदार्थवृत्तिमध्ये केवदन्त्यन्यां निदर्शनामि
अत्र कान्तैः शबरसुदृशामित्युक्त्या आलंबनविभावस्य आलंब
द्दीनपनविभावस्यच अद्रिकुञ्जेषु दृश्यचन्द्रोदय श्रीरितिच उ
वस्य सार्धमासीनानामित्यनुभावस्य तदाक्षिप्तानां संचारिरा
संभोग शृंगारो व्यज्यते तदुक्तं अनुकूलौ निषेवेते यत्रान्योन्यं
दर्शनस्पर्शनादीनि ससंभोग उदाहृत इति केचिदिमंरसाभा
एकत्रैवानुरागश्चेत्तिर्यङ् म्लेच्छगतोपिवा । योषितो बहुसक्ति
स्त्रिधामतइति रसएवायमिति विद्याधरः तदुक्तं विभावादि
प्रतिप्रयोजकः नविभावादिज्ञानं ततश्च तिरश्चामप्यस्त्येवरसइ
म्लेच्छगतोपिकैमुत्येनास्तिरस इतिबोध्यं निकुञ्जकुञ्जौवाक्लीबे
हितोदर इत्यमरः भेदाः किरातशबरपुलिन्दा म्लेच्छजात
स्यौत्स्यसामर्थ्ययोश्शक्तौ बलं नाकाकसीरिणोः, गरुत्पक्षच्छद
शबरशब्दात् जातिलक्षणङीषि पुंवत्कर्मधारयेत्यादिना पुंवः
चन्द्रोदय श्रीरित्यत्रैनयङुवङ् स्थानावस्त्रीति नदीसंज्ञानिषे
क्षणामित्यत्र अत्यन्तसंयोगेद्वितीया, अनुसारीत्यत्र आवश्यव
निरिति अवश्यं भावविशिष्टे कर्तरिणिनिः, दूरादित्यत्र दूरा
द्वितीयाचेति चकारात्पञ्चमी, उड्डीयेथाः डीङ् विहायसागतं

अङ्गीकुर्व न्नमृतरुचिरा मुत्पतिष्णोस्सलीलं
छायामन्त स्तवमणिमयो माल्यवानेषशैलः ।
शोभांवक्ष्य त्यधिकललितां शोभमानामतीन्दो
र्देवस्यादे रुपजनयतो मानसादिन्दुबिम्बम् ॥ ॥१७॥

कर्तरिलिङ्. (१६)

त्संबन्धान्माल्यवतः अपूर्वाशोभासंभविष्यतीत्याह, अङ्गीकुर्व
णेःप्रकृतोस्मिन्मणिमयः (प्राचुर्येण प्रस्तुतं प्रकृतमित्युच्यते) रत्न
र्थः मणिरत्न इन्द्रनीलः वक्ष्यमाण निदर्शनानुगुण्यात् मणिम
प्रतिबिंबग्रहणार्हत्वार्थमितिबोध्यं । माल्यवान् तन्नाम्नाप्रसिद्धः
न्नतरः शैलः अद्रिः लीलयासहवर्ततइति सलीलं यथा तथा
ः साधूत्पतनकारिणः इन्दुमतिक्रान्तः अतीन्दुः तथाभूतस्य
वः अतीन्दो इतिक्वचित् संबुध्यन्तः पाठः तव अमृतं सुधेव
नोहरा तद्वदवदातेत्यर्थः तां छायां प्रतिबिंबं अन्तः मध्ये
स्वीकुर्वन् सन् मानसात् मनसः आत्मीयादितिभावः इन्दु
मण्डलं उपजनयतः सृजतः चन्द्रमामनसो जातइतिश्रुतेः अत्र
१ चन्द्रस्य बहिर्निर्गमोन्मुखत्वावस्थासूच्यते आदेः जगत्कारण
नारायणस्य अधिकंललितारमणीयातां विस्पष्टपटुवत्समासः
ामनेन आमूललोलादिषुवृत्तिर्विस्पष्टपटुवन्मयूरव्यंसकादित्वा
ोभमानां दीप्यमानां शोभां श्रियं वक्ष्यति धारयिष्यति। अत्र
ेत विशेषणस्य छायाग्रहणयोग्यत्वाभिप्रायकतया परिकरः
ारां अतीन्दोरिति विशेषणयोः चन्द्रसादृश्याभिप्रायकतय
। अनेन शोभां वक्ष्यतीति माल्यवति देवशोभावर्णनरूपा

मार्गौसम्यङ् ममहनुमता वर्णितौद्वौतयोस्ते
सह्यासन्नो ऽप्यनघसुभगः पश्चिमोनित्यवर्षः ।
प्राचीनेतु प्रतिजनपदं संहताबद्भुतानां
मग्नादृष्टिः कथमपिसखे मत्कृतेतेनिवार्या ॥ ॥१

त्याप्यत इतिसंकर इतिसंक्षेपः मणिमय इत्यत्र तत्प्रकृतवचने
नयट्। उत्पतिष्णोरित्यत्र अलंकृञित्यादिना तत्साधुकारिणिइष्
दोरित्यत्र अत्यादयः क्रान्ताद्यर्थे द्वितीययेतिवार्तिकेनसमासः।
र वहतेर्भविष्यति कर्तरिलृट्। उत्पतिष्णुस्तूत्पतितेत्यमरः छाय
कान्तिः प्रतिबिंबमनातप इत्यमरः मध्येन्त रन्तरेणान्तरेन्तरा
न्द्रः. (

ाथ अनुकूलं पन्थानमुपदिशति - मार्गाविति, प्रशस्ताहनुः ३
। हनुमान् प्रशंसायां मतुप् मत्करोत्सृष्टवज्रेण हनुस्तस्य तदाक्ष
रहरिशार्दूलो भविता हनुमानिति। इतीन्द्रोक्तत्वात्प्राशस्त्यं।
तेनाद्वौ मार्गौ पन्थानौ प्राचीन प्रतीचीनावित्यर्थः सम्यक्
यथा तथा मम मांप्रतीत्यर्थः वर्णितौ कथितौ मम हनुमते
ना। तदामदीयेनेत्यर्थः तयोर्मार्गयोर्मध्ये ते तव अविद्यमानं
यस्मिन् तथा भूतश्चासौ शोभनाः भगाः भजनीयवस्तूनि य
भूतश्चेति खञ्जकुब्जादिवत्समासः त्वदपेक्षया अनघसुभगइ
द्भवः पश्चिमः प्रतीचीनोमार्गः (कर्ता) सह्यस्य तन्नामकस्य प
न्नोपि सन्निकृष्टोपि माल्यवत्कुटुंबिनस्तत्र सह्योहि निकटवर्तीति
ासन्नइति मार्गस्यपरिचायकं विशेषणं) नित्यं अनवरतं वर्षं
ाम् तादृशः भवतीतिशेषः सह्यस्य नित्यवर्षत्वेन तदासन्नो मा

भावः सह्यासन्नोमार्गः तत्रनिकटवर्त्यपि अनवसुभगोपि नित्य भीरोः तव त्याज्यएवेतिभावः। ते सह्यं समतिक्रम्य मलयंच आसेदुरानुपूर्व्येण समुद्रं भीमनिस्वनमित्युक्त्या पश्चिममार्गस्य बोध्यं, यद्वापश्चिमः ते ।वसुभगोपि सह्यासन्नः अतएव भवतीतियोजना । ।तंसुभगइतिपाठे पश्चिमः सह्यासन्नोपि प्रतएव ते अनतिसुभगो भवतीतियोजना अतिसुभगोन भव भगः अयमेवपाठः सुन्दरः। अथपरिशेषात् प्राचीनएवगन्तव्यः तो गमनप्रतिबन्धो मत्कृते त्वया कथमपि परिहरणीयइत्याह त्रीनेतु प्राग्दिग्भवे मार्गेतु तुशब्दः गमनप्रतिबन्धकसद्भावरूपं बोधयति ईदृशदोषाभावएव पश्चिमस्य अनवत्वमितिबोध्यं छःपाठः द्वौमार्गावित्युपक्रमानुगुणयात् प्राचीनेष्वितिपाठे तद संक्षेपः। जनानांपदं जनपदः ग्रामसमुदायः जनपदे जनपदे प्रति प्सायामव्ययीभावः अद्भुतानां चित्रवस्तूनां संहतौ वृन्दे मग्नाम दृढलग्नेत्यर्थः ते तवदृष्टिः लोचनं ममकृते मदर्थे कथमपि न निवार्या निवारणीया यद्वा ते निवार्येतियोजना । कर्तरि नित्यवर्षइति विशेषणस्य त्याज्यत्वाभिप्रायकत्वात् परिकरः। गइतिपाठे अनतिसुभगत्वं प्रति नित्यवर्ष इत्यस्य विशेषणग [काव्यलिंगं। उत्तरार्धे सखायं प्रतित्वयासत्वरं गन्तव्यमित्याज्ञा ते तस्यैव भंग्यन्तरेणाकथनात् पर्यायोक्तं। पर्यायोक्तंतुगम्यस्य तराश्रयमितिलक्षणात् ॥ पश्चिमइत्यत्र अग्रादि पश्चाड्डिम ग्रेडिमच्। नाड्यप जनोपपदानि वृणाङ्गपदानी त्यनुशासनात् दस्यपुंस्त्वं ॥ हनुर्हनूस्तनुश्चैवमितिकोशः। प्राचीनं प्राग्भव

श्रुत्वाशब्दं श्रवणमधुरं तावकंपामरीणां
प्रत्यासन्ना त्सपदिभवना त्सादरंनिर्गतानाम् ।
अभ्रूभंगे प्यधिकसुभगै र्निश्चिताङ्गःकटाक्षैः
देशानेता न्वनगिरिनदी संविभक्तान्व्यतीयाः ॥

न्त्रिष्वित्यमरः । स्त्रियान्तुसंहतिर्बृन्दमित्यमरः । अर्थेक्तेच
ध्यर्थेऽव्ययसंज्ञिताविति नैघण्टुकाः.

अथ निकटवर्तिनां देशानां लंघनमर्थयते, श्रुत्वेति
श्रोत्रयोः मधुरं प्रियं तवायं तावकः त्वदीयः तं शब्दं निना
कराणं प्रत्यासन्नात् तवसमीपस्थात् भवनात् गृहात् सपदि
रेण सहवर्ततइतिसादरं यथातथा निर्गतानां निःसृतानां
व्यक्तिदिदृक्षयेतिभावः पामरीणां प्राकृतस्त्रीणां भ्रुवोः भंगः
अभावः अभ्रूभंगः तस्मिन्नपि भ्रूविकाराभावेसत्यपीत्यर्थः अ
मनोज्ञैः विस्पष्टपटुवत्समासः अनेन प्रकृत्यैव निरतिशयसौ
कटाक्षैः अपाङ्गदर्शनैः निश्चितानि निचितानि व्याप्तानीत्
अवयवाः यस्यतथोक्तस्सन् अत्र अङ्गानां एकैकस्य
त्वोक्त्या दर्शनीयतमत्वं व्यञ्जितं वस्तुतस्तु निश्चितानि चरण
श्चरक्ता अन्यच्छ्वेतमितिरीत्या निर्णीतानीत्यर्थः अङ्गानि अ
तथोक्तस्सन्नित्यर्थः (नत्वङ्गीहंसोनिश्चितः तासांपामरत्वेन हं
त्वादितिभावः) वनानिच गिरयश्च नद्यश्च वनगिरिनद्यइतीत
ताभिः वनगिरिनदीविशेषैरित्यर्थः तेन जातिरप्राणिनामिति
द्वैकवद्भावस्य नावकाशः अन्तादिवच्चेतिसूत्रभाष्ये क्षीरोदकं
प्रयोगोऽत्रप्रमाणं बोध्यं । संविभक्तान् सम्यग्विभक्तान्

इक्षुच्छाये किसलयमयं तल्पमातस्थुषीणां
तल्लापैस्तै र्मुदितमनसां शालिसंरक्षिकाणाम् ।
कर्णाटान्ध्र व्यतिकरवशात् कर्बुरैर्गीतिभेदै
र्मुह्यन्तीनां मदनकलुषं मौग्ध्यमास्वादयेथाः ॥ ॥२०॥

ा केचिन्नचेति सम्यग्विभक्तानित्यर्थः एतान् समीपवर्तिनः
ायान् व्यतीयाः व्यतीत्यगच्छेः नात्रकिंचिद्दर्शनीयमस्तीति
प्रत्र श्रवणमधुरमितिविशेषणस्य सादरनिर्गमहेतुत्वात् काव्य
भङ्गरूपकारणाभावेपि अधिकसुभगत्वरूप कार्यवर्णनाद्विभा
ावनाविनापिस्यात्कारणं कार्यजन्मचेदितिलक्षणात् । पाम
ावस्यवर्णनात् स्वभावोक्तिश्च । अत्र सादरनिर्गमन निरन्तर
नादिभिरनुभावैः औत्सुक्यादिभिस्संचारिभिश्च हंसनिनादाङ्ग
विस्मयस्य परिपोषादद्भुतरसोव्यज्यत इतिसंक्षेपः ॥ तावक
ादिमित्यणि तवकममकावेकवचन इतितवकादेशः । पामरीणा
ापल्यादेराकृतिगणत्वात्ङीष् ।. अभ्रूभंगइत्यत्र रक्षोहागमलघ्व
ायोजनमिति भाष्यप्रयोगात् अस्य अव्ययीभावेन, विकल्पः।
यत्र व्यतिपूर्वात्कादिणः प्रार्थनायां कर्तरिलिङ् ॥ सद्यस्सपदि
मरः । विवर्णः पामरोनीचः प्राकृतश्चपृथग्जनइत्यमरः । कटा
र्शनेइत्यमरः । भरितं निचितं व्याप्तमितिहेमचन्द्रः । निमग्न
ायोरिव निचितनिश्चितशब्दयोः एकार्थकत्वंबोध्यं । परन्तु
ब्दस्य निचितशब्दपर्यायितया प्रयोगान्तरमन्वेषणीयम्॥ (१६
कर्णाटान्ध्रदेशसंभेदसीम्नि शालिगोपीनां मौग्ध्यविशेषमनुभ
ुक्ष्वेति। इक्षूणां छाया इक्षुच्छायं तस्मिन्, किसलयाः पल्लवा

एव किसलयमयं तल्पंशय्यां आतस्थुषीणां आस्थितवतीनां
मितियावत् तैः अनिर्वचनीयैः सल्लापैः मिथोभाषणैः मुदितं ।
यासां तथोक्तानां कर्णाटानां अन्ध्राणांच निवासो जनपदः
अन्ध्राः तेषां कर्णाटान्ध्रदेशयोरित्यर्थः व्यतिकरस्य संपर्क
अधीनत्वाद्धेतोः कर्बुरे शबळे नानाजातीयइत्यर्थः मधुदुग्धा
वत् विलक्षणास्वादइतिभावः गीतीनां गानानां भेदे विशेषे
मोहं प्राप्नुवतीनां वेद्यान्तरशून्यमास्वादमश्नुवतीनामित्यर्थः
व्रीहीणां संरक्षिकाः पालिकाः स्त्रियः तासां मदनेन मन
आविलं अयथाभूतमित्यर्थः मौग्ध्यं मुग्धावस्थामित्यर्थः उदयद्
लज्जाविजितमन्मथेति मुग्धायालक्षणंबोध्यं, आस्वादयेथाः अ
पनवशात् मन्मथातिरेकेण व्रीडामान्द्ये तासां मुग्धावस्थापि
विलक्षणास्वादा भवतीतिभावः अत्र कर्बुर इति विशेषणस्य मे
काव्यलिङ्गं इक्षुच्छाय किसलयतल्प सल्लाप गीतिभेदादिभि
तदाक्षिप्तैरन्यैश्च शालिगोपीगतायारतेः परिपोषात् शृङ्गारः ६
संक्षेपः। इक्षुच्छाय इत्यत्र च्छाया बाहुल्य इति क्लीबत्वं किसलय
च्चिन्मयमित्यादाविव स्वार्थिकोमयट्. आतस्थुषीणामित्यत्र अ
स्थाधातोः भूतसामान्येलिटः क्वसुश्चेति क्वसुः उगितश्चेति ङीप्
छान्दसत्वेपि मूलवता कविप्रयोग बाहुल्येन भाषायामपि साधुत्व
किंच उपसर्गेण धात्वर्थो बालादन्यः प्रतीयते इत्युक्तया अ
भूधातोरिव अस्यापि अर्थान्तरपरतया सकर्मकत्वं कर्णाटान्ध्रे
क्तवद्व्यक्ति वचन इत्यणोलुपि प्रकृतिवल्लिङ्ग वचने। शालिसं
संपूर्वाद्वृतेः कर्तरिण्वुलि टापि प्रत्यय स्थात् इतीत्वम् शेषपष्ठ्य

गोर्वासा दवनिवहना द्बद्धरत्नैश्शिरोभिः
स्साक्षा दयमिति जनैस्सम्यगुन्नीयमानः ।
र्युक्तो लघुभिरचिरान्मुक्त निर्मोककल्पैः
भावी तदनु नयने रञ्जयन्नञ्जनाद्रिः ॥ ॥२१॥

दे: णिजन्तात् कर्तरिप्रार्थनायां लिङ् । तल्पं शय्याट्टदारेषु भाषणंमियः इतिच अमरः त्विष्वधीने वशो वाञ्छा प्रभुत्वा ति रत्नमाला कलुषं त्वाविले पाप इति मेदिनी॥ (२०)
द्रिः तवनयनपदवीं अधिरोक्ष्यति इत्याह विष्णोरिति । स्वादानन्तरं तद्देशातिवर्तनानन्तरमित्यर्थः, विष्णोः नारा त् अवस्थानात् अवनेः भूमेः वहनात् धारणात् बद्धानि रत्नानि मणयः येषु तैः शिरोभिः शिखरैः उत्तमाङ्गैश्च नैः लोकैः कुशलैरित्यर्थः, अयंदृश्यमानोगिरिः साक्षात् अनन्तः स इति सम्यक् सोपपत्तिकम् यथातथा उन्नीयमानः विष्णुवासादि हेतूनामत्रापि सत्वादितिभावः अतएव लघुभिः धवमुपयातैः अनेन धवलत्वं सूचितं अचिरात् तदानमिव : ये निर्मोकाः ईषदसमाप्तास्ते अचिरान्मुक्त निर्मोककल्पानि तिपाठे अचिरं उन्मुक्तानित्यक्तानीत्यर्थःतैः अभ्रैः मेघैः युक्तः नाद्रिः वेङ्कटगिरिः नयने तवलोचने रञ्जयन् प्रीणयन्सन् [भावीभविता ॥ अत्र विष्णुवासादिभिः गिरेः शेषत्वानुमा नालंकारः । तदुत्थापिताचाभ्रेषु निर्मोक तादात्म्योत्प्रेक्षेति भावसङ्करः । इवादेरिव कल्पबादेरपिकचित् संभावनापरत्वम् देश्याद्याः स्पर्धिप्रतिभटादयः निभवद्वादयश्चापिकचित्

तत्रारूढै र्महतिमनुजैः स्वर्गिभिश्चावतीर्णैः
संवोन्मेषा द्व्यपगतमिथ स्तारतम्यादिभेदैः ।
साधारण्या त्फलपरिणते स्संवशोबध्यमानां
शक्त्याकामं मधुविजयिन स्त्वंचकुर्यास्सपर्याम् ॥

संभावना पराइत्युक्तं द्रष्टव्यम् । नयनरञ्जनं प्रतिपूर्ववाक्यार्थ
काव्यलिङ्गं ॥ निर्मोककल्पैः इत्यत्र ईषदसमाप्तौ कल्पप् ॥ स
तुल्ययोरित्यमरः । शेषोनन्तोहरिश्शेषं त्रिष्वन्यदुपयुक्ततः । इ
समौकञ्चुक निर्मोकाविति (सर्पप्रकरणे) अमरः ॥ शेषस्य
अवनिवहनकथा वराहपुराणे. पृथिवी । मांसमुद्धृत्यपाताळात्
शोभिते । रत्नपीठइवोत्तुङ्गे सरत्ने अनन्तमूर्धनि । कृत्वामांसुरि
श्चापिन्यवेशयः । मद्धारणात्तमान् पुण्यान् त्वन्मयान्पुरुषोत्तम
तत्रैव पश्चाद्वराहोक्तौ महेन्द्रो मलयस्सह्यः सिंहाद्रिरपिरैवतः ।
नोनाम शैलस्स्वर्णमयोमहान् । एते शैलवरास्सर्वेत्वदाधाराव
न्तेनप्रतिपादिता । अत्र सिंहाद्रिर्वेङ्कटाद्रिरेव अतएव अग्रे
नाम वासुदेवालयोमहानिति भूम्याधारेषु गिरिषु वर्ण्यते वेङ्क
त्वमुक्तं ब्रह्माण्डपुराणे शेषस्य उक्तौयथाशेषे मदङ्गेत्वं वैकुण्ठे
शैलाकारेचमद्देहे नित्यमत्रवसप्रभो इत्यादिना । वेङ्कटगिरेः
त्वयत्वे हेतुः ब्रह्माण्डपुराणे ब्रह्मणोक्तः । अञ्जनेत्वंहिशेषाद्
सुदारुणं । पुत्रंसूतवतीयस्मात् लोकत्रयहितायवै । प्रसि
अञ्जनेतवनामतइति ॥

अथ असंसेव्यहरिसाक्षात् दिव्यक्षेत्रातिवर्तनमित्युक्तं ः
परिहर्तुं त्वयापि तत्र भगवतस्सेवाकार्येत्याह. तत्रेति, म

।स्यचबध्यमाना मित्यनेनान्वयः । आरूढैः आरोहणं कृत
र्यान्तमितिशेषः) मनुजैः मानवैः अवतीर्णैः अवरोहणं
र्गिभिः देवैश्च सत्वस्य सत्वगुणस्य उन्मेषात् रजस्तमसी
उद्रेकात् हेतोः शुद्धसत्वमयोह्येषसाक्षाच्छेषात्मकोगिरिरि
हिम्नेतिभावः मिथः अन्योन्यं यत् तारतम्यं न्यूनाधिकभावः
यस्य तादृशोयोभेदः विलक्षणत्वं सः व्यपगतः विशेषेण
षां तथाभूतैस्सद्भिः आदिपदेन देवमनुष्यत्वादेर्ग्रहणं, मिथ
: स्वरूपसत्वेपि सत्वोन्मेषमहिम्ना तद्बुद्धिर्विगळितेतिभावः।
दिष्टानां परिणतेः परिपाकस्य साधारण्यात् तुल्यत्वात् संवशः
ाः बध्यमानां क्रियमाणामित्यर्थः मधुविजयिनः मधुरिपोः
सपर्यां पूजां त्वं चत्वमपि शक्त्याबलेन यथाशक्तीत्यर्थः
यथातथा कुर्याः विरचयेः । शक्त्यावञ्चितोमाभूरितिभावः
।वत्सपर्याकरणे बृह्मादीनामप्यक्षमतयायथा शक्तिकरणे कोम
ाचलयोर्विशेषइति न्यायेन तव अन्येषाञ्चसाम्यमेवेतिभावः॥
न्मेषेण सुराणां नराणांच विशेषानुपलंभवर्णनात् सामा
। सामान्यं यदि सादृश्या द्विशेषोनोपलभ्यत इतिलक्षणात् ।
रसामान्येन हंसस्यापि सपर्याकणरूपे प्रस्तुतवृत्तान्ते वर्ण्य
मेषात् साधारण्यात् इत्यादिविशेषणसाम्येन श्रीवैकुण्ठे नित्य
ाणेषु परमपुरुष कैङ्कर्येषु अर्वाचीन मुक्तस्यापि अन्वयरूपा
न्तप्रतीतेः समासोक्तिः । विशेषणानां साम्येनयत्प्रस्तुतव
स्तुतस्य गम्यत्वं सासमासोक्तिरिष्यत इतिलक्षणात् तया अञ्ज
यविभूत्युपमाव्यज्यत इत्यलंकारेणालंकारध्वनिः॥ आरूढैरवत

स्तोकोन्मग्न स्फुरितपुळिनां त्वन्निवासेच्छयेव
द्रक्ष्यस्यारा त्कनकमुखरां दक्षिणामञ्जनाद्रेः ।
आसन्नानां वनविटपिनां वीचिहस्तैःप्रसूना
न्यर्चाहेतो रुपहरतिया नूनमर्धेन्दुमौळेः ॥

र्गैरित्यत्र गत्यर्थाकर्मकेत्यादिना कर्तरिक्तः तारतम्येत्यत्र
र्भविः तारतम्यं ब्राह्मणादित्वात् ष्यञ् तरतमशब्दौ नित्यसमा
धिकार्थे रूढौ सुबन्तौ नतुप्रत्ययौ तथात्वे स्वातन्त्र्येण प्रयोगा
संघशइत्यत्र संघशब्दस्य बहुयकत्वं अङ्गीकृत्य बहुल्पर्यादिति
कर्तृकारकाच्छस् प्रत्ययः कामं प्रकामं पर्याप्तं निकामेष्टं
मित्यमरः.

अथाञ्जनाद्रेः दक्षिणतः कनकमुखराख्यान्नदीं द्रक्ष्यसीत्या
त्वन्निवासे (विश्रमाय) स्थितौ इच्छयास्पृहयेव स्तोकं उन्मग्नं
ामुवत् (आदिकर्मणिक्तः) अतएव स्फुरितं विशदतया प्रव
ुळिनं तोयोत्थितद्वीपं यस्यास्तां दर्शयन्तिशरन्नद्यः पुळिनानि
रित्युक्तरीत्या व्यज्यमान पुळिनामित्यर्थः अञ्जनाद्रेः वेङ्क
आरात् समीपे दक्षिणां दक्षिणदिशि स्थितां सरळांच क
ुवर्णमुखराख्यां नदीं कनकैः भूषणैः मुखरां शब्द
द्रक्ष्यसि विलोकिष्यसे । तामेवविशिनष्टि । यासुवर्णमुख
ानां निकटवर्तिनां वनविटपिनां अरण्यवृक्षाणां नत्वन्यदीय
न्नत्व विशेषणेन स्वपोषितत्वं द्योतयता स्वप्रयत्नकृतत्वं व्यज्यते
कुसुमानि (कर्म) अर्धश्चासाविन्दुश्च अर्धेन्दुः बालचन्द्रः मौ
कूटे यस्य तस्य अर्धेन्दुः मौळिः शेखरोयस्येतिवा शिवस्य ।

वहेतुस्तस्य (हेतुरिहफलं) यद्वा अर्धेन्दुमौळेः (कर्तुः) वेङ्क
हितोरित्यर्थः वीचयस्तरङ्गा एव हस्ताः तैः उपहरंति नूनं,
अर्पयतीवेत्यर्थः यथा शुश्रूषमाणाशिष्यागुरोः एवमितिभावः
पुळिनत्वं प्रति अहेतोः इच्छायाः हेतुत्वेन संभावनात् हेतू
चिहस्तैरितिरूपकोत्थापिता कुसुमोपहारोत्प्रेक्षाच । किंच
वृत्तान्ते वर्ण्यमाने तत्सारूप्येण श्लिष्टविशेषणसाम्येन चाप्र
रागातिशयविगळित नीवीबन्धदर दृश्यमानस्फुरितजघनायाः
: रसिकायाः पुष्पापचय व्यग्रहस्तायाः कस्याश्चिद्वृत्तान्तस्य
ासोक्तिश्च । स्तोकोन्मग्न स्फुरितपुळिनां त्वन्निवासेच्छयेत्यत्र
प्रणयवचनं विभ्रमोहि प्रियेष्वितिन्यायेन प्रथममेव विभ्रमस्य
आदौवाच्यः स्त्रियारागः पुंसः पश्चात्तदिङ्गितैरित्युक्तः रागस्य
व्यज्यते॥ अर्धेन्दुमौळेरित्यत्र अग्रहस्तादिव त्समानाधिकरण
तत्र इन्द्रादिस्समुदायशब्दोऽवयवे वर्तते । प्रथमव्युत्पत्तौ गङ्गा
त्वात् सप्तम्याः परनिपातः । चूडाशब्दश्शेखरपर्यायोपिदृश्यते।
विशुद्धसिद्धतटिनी चूडालचूडापद इत्यादिप्रयोगात् । अर्चा
षष्ठीहेतुप्रयोग इतिषष्ठी । उपहरतीत्यत्र पातुत्वप्रथमव्यत्वस्याति
देवत् कालसामान्ये लट् । तयोत्थितं तत् पुळिनमिति । आर
ारिति । भित्तंशकलखण्डेवा पुंस्यर्धइति । चूडाकिरीटं केश
ळयस्त्रय इतिचामरः ॥ शिवकर्मकार्चायां स्कान्दे सुवर्णमुर
गेने अत्रास्तिभगवानीशः ख्यातोऽगस्त्येशसंज्ञया । स्थापितो
ना लोकानन्दविधायिना । स्नात्वातस्यां महानद्यां तल्लिंगं पू
दशानां अश्वमेधानां फलं संप्राप्नुवन्नित इत्युक्तं शिवकर्तृ

निर्विश्यैनां निभृतमनभि व्यक्तमंजुप्रणादो
मन्दाधूतः पुलिनपवनै र्वंजुलामोदगर्भैः ।
अव्यासंग स्सपदिपदवीं संश्रयान्यैरलंघ्यो
बन्दीकुर्यु स्तटवसतयो माभवन्तंकिराताः॥

वेङ्कटेशकर्मकार्चायां वामनपुराणे वेङ्कटाचलमाहात्म्ये अगस्त्
शेषाद्रेर्दक्षिणतस्त पस्यता शंकरेण परावरपतिर्देवो विश्वयोनिज
मयाचान्यैश्च विश्वात्माध्येयो नारायणोहरिः । नान्योध्येयः पु
पूज्योवानचविद्यते । तमृतेजगतांनाथं सर्वव्यापिनमीश्वरं । नारा
अस्मिन् वसत्येषसनातनः । नारायणोजगद्योनिः भगवान्पुरुषे
अस्मिन्यस्तंमनोयस्मात् मयासर्वेश्वरेहरौ । तस्मात्समागतं त्व
माषेनचान्यथेत्युक्तंचप्रमाणम्.

अथ श्रमापनोदाय तत्रकिञ्चिद्विश्रम्य गच्छेरित्याह । निर्वि
एनाम्. सुवर्णमुखराम् । अनभिव्यक्तः अस्फुटः मञ्जुः मेनाहरः
क्कुष्टशब्दः अनुरागजश्शब्दविशेषश्च यस्य तथाभूतस्सन् ।
नेश्चलम् यथा तथा गूढश्चेतिव्यज्यते । निर्विश्य उपभुज्य तत्
पर्थः । वञ्जुळानां विकाराः वञ्जुळाः वानीरकुसुमानि तेषां
रुव्यापको गन्धविशेषः सः गर्भेयेषांतैः । अनेन सौरभ्यमुक्त
ानां तोयोत्थितद्वीपानां पवनैः वातैः अनेन शैत्यं सूचितम्
यातथा आधूतः वीजितस्सन् अनेन पवनस्य मान्द्यं सूचितम् ।
सुरत श्रमस्सन्निितिचव्यज्यते । अविद्यमानः व्यासङ्गः अत्य
स्यतथोक्तस्सन् । अन्यैः तत्रत्यैर्जनैः अलङ्घ्यः अपरिभा
दवीं सरणिं सपदि तत्क्षणमेव संश्रय आश्रय । अलङ्घ्यामि

ुण्डीराख्यं तदनुमहितं मण्डलंवीक्षमाणः
ेलंयायाः क्षपितदुरितं तत्रसत्यव्रताख्यं ।
ात्यैरोषा त्सलिलवपुषो यत्रवाग्देवतायाः
ःसेतुर्जज्ञे सकलजगता मेकसेतुस्सदैवः ॥ ॥२५॥

हंसानामित्युक्तरीत्यादवीयस्त्वेन दुष्प्रापामित्यर्थः । सपदि फलमाह । तटं कनकमुखरातीरम् वसतिः वासस्थानंयेषान्ते ञेच्छजाति विशेषाः । भवन्तं त्वां मा बन्दीकुर्युः प्रग्रहंमाकु ेतु कुर्युरितिभावः ॥ अत्र हंसवृत्तान्ते वर्ण्यमाने विविक्तदे कीयासंभोगस्य शीतसुरभिमन्दानिलापनीतखेदस्य ईदृश्या ाुतदनुबन्धि जनावस्कन्दनभीत्या त्वरितमपसर्पतोधूर्तस्य वृत्ता ा इतिसमासोक्तिः ॥ वञ्जुळेत्यत्र वैकारिकस्याणोलुपि लुपि ावचने इति प्रकृतिलिङ्गवचनत्वम् । संपूर्वकात् श्रिञ र्थनायांलोट् । माबन्दीकुर्युरित्यत्र अबन्दीं बन्दीं सम्पद्यमान ाकुर्युः । मास्तुमाकुर्वित्यादाविवायं निषेधेमाशब्दः नातोलुङ्। शब्दस्यादनुरागजइति । निभृतविनीतप्रश्रितास्समाइति । निं स्म्यादिति । प्रग्रहोपग्रहौबन्द्यामितिचामरः. (२४

ुण्डीरमण्डले सत्यव्रतक्षेत्रङ्गच्छेरित्याह । तुण्डीरेति ॥ तदः णानन्तरं महितं पूज्यमानं तेन सार्वकालिकं पूज्यत्वं फलितम् याख्यायस्य तन्मण्डलं देशंवीक्षमाणः पश्यन्सन् तत्र मण्ड ारस्तं दुरितं पापं येन तथोक्तम् । अतएवोक्तं हस्तिगिरिमाहात्म् ातन्नामक्षेत्रं पापप्रणाशनमिति । सत्यव्रतमिति आख्यानामयस् . सत्यफलाविसंवादिव्रतं शास्त्रीयनियमः यस्मिन्तदित्यन्वः

यसंज्ञा । "यानिवृतानितत्रैव कृतानिविगुणान्यपि । तानिसत्
तिसत्यव्रतंस्मृतम् ॥ इतिहस्तिगिरिमाहात्म्योक्तेः । चेत्तं (
क्त्या) पुण्यं स्थानं यायाः गच्छेः याप्रापणे प्रार्थनायां
पणामिहगतिः तदेवविशिनष्टि । यत्क्षेत्रे सकलानां निखिला
वनानां एकः अद्वितीयः सेतुः आळिः असङ्करकारकइत्यर्थ
विधरण एषां लोकानामसंभेदायेति' श्रुतेः सः प्रसिद्धः देवः
सर्वभूतेषुगूढः' इत्यादिषु श्रुतः नारायणः पत्यौ भर्तरिचत्
षात् चित्तविकारविशेषात् स्त्रीपुंसयोरन्योन्य विषयश्चित्त
पो विकारो रोषः सचप्रकृते पुरुषगोचरोऽवज्ञाहेतुकः । तद्
नगदितस्त्रीणां रोषः पुरुषगोचरः । सपत्नीहेतुराद्यस्यादन्यस
इति॥ सलिलं जलं वपुः शरीरं यस्यास्तस्याः नदीरूपायाइ
रां देवता अधिष्ठात्री तस्यास्सरस्वत्याः सेतुः आळिः जज्ञे
नीप्रादुर्भावे कर्तरिलिट् ॥ अत्रेयं हस्तिगिरिमाहात्म्योक्त
धेया ॥ पुराकिलकृतयुगे विष्णुं साक्षात्कर्तुकामः तस्मिन्
आत्मीयं मनः पश्यन् तच्छुद्धये सत्यव्रतक्षेत्रे अश्वमेधेन यक्ष्
ामिष्यतां सर्वेषां आवासाय विश्वकर्मणा काञ्चीन्नामनगरीं
हस्तिशैलञ्च उत्तरवेदिं कारयित्वा केनापिनिमित्तेन पूर्वमेव
वतीनदीं अध्यासीनां सरस्वतीं देवीं उपेक्ष्य तदंशभूतया स
दीक्षितः अर्हणे नियुक्तैः द्विजोत्तमैः सादरं विशेषतः क्रिय
नावनां दृष्ट्वासाभ्यसूयैरसुरैः अश्वमेधभंगाय तैस्तैरुपायैः को
त्रात् महानदीरूपमास्थाय महतावेगेन सर्वं संक्षोभयन्तीं यज्ञ
प्रवहन्तीं सरस्वतीं दृष्ट्वा भयविह्वलैः पौरजानपदैः विज्ञापिते

नारत्नै रुपचितगुणां नित्यसंगीतनादां
मेद्रक्ष्य स्युचितविभवं भूषणांतत्रकांचीम् ।
स्यांनित्यं निहितनयनो हस्तिशैलाधिवासी
न्द्वातीत स्सखलुपुरुषो दृश्यतेसत्यकामः ॥ ॥२६॥

याविष्टैः अभ्यर्थितो यजमानो ब्रह्मा भगवन्तं तुष्टाव । तदा
मानः प्रसन्नो भगवान् यज्ञवाटस्य पश्चिमे शेषपर्यङ्केशयानः
। ततस्सरस्वती सेतुभूतेन भगवतानिरुद्धतया गन्तुमशक्ता
भूत्वा बहुधा विप्रकीर्णा भगवतः पार्श्वद्वयेन सागरंप्रययौ ।
मत्या मुनिभिस्तुता सरस्वती दक्षिणतो वेगवतीनामकस्रोतो
विर्भूता पूर्वप्रार्थितं सर्वनदीश्रेष्ठयश्च प्राप्य यज्ञशालामुपागम्य
रणीबभूवेति ॥ अत्र वर्णनीयस्य सत्यव्रतक्षेत्रस्य सेतुभवन
न्देवचरितमङ्गतया वर्णित मित्युदात्तालङ्कारः । उदात्तमृद्धेश्च
श्चान्योपलक्षणमिति लक्षणात् ॥ उपलक्षणं, अङ्गं । अत्रद्वि
बोध्यम् । महितमित्यत्र मतिबुद्धीत्यादिना वर्तमानेक्तः। सेतु
नोति बध्नाति जलमिति सेतुः षिञ्बन्धने मण्डलं परिधांकोऽ
राजस्त्रिवतिमेदिनी । क्षेत्रं भार्याङ्गकेदारपुण्यभूगृहयो निर्विति
। सेतुरालौ स्त्रियां पुमानत्यमरः॥ (२९
सत्यव्रतक्षेत्रे काञ्चीन्नामनगरीं द्रक्ष्यसीत्याह । नानेति । नान
रत्नानि श्रेष्ठवस्तूनितैः उपचिताः अभिवर्द्धिता गुणा रामण
द्यादयो यस्यास्तां अन्यत्र नानारत्नै रनेकमणिभिः उपचित
खचितइतियावत् गुणस्सौवर्णदामयस्यास्ताम् । नित्यः सार्वत
ङ्गीतस्य नृत्तङ्गीतश्च वाद्यञ्च त्रयं सङ्गीतमुच्यतइत्युक्तस्य तै

परपर्यायस्य नाद्भस्य नादोयस्याम् । अन्यत्र नित्यस्सन्त
षयसङ्गः विषयास्वाद इतियावत्. अतिशायितस्सोऽस्यास्ती
(अतिशायनेमतुप्) तेन इतः प्राप्तः आदरेणानुभूत इ
ध्वनिः यस्याः । यद्वानित्यः अनवरतः सङ्गीतः सम्यग्गी
त इतियावत् नादोयस्याः तथाभूताम् । भूमेः भुवः उचि
ः ऐश्वर्यं यस्य तथाभूतं भूषणं परिष्कारं भूमेस्तादृश
र्यः । भूमिर्हिरत्नगर्भा वसुमतीतिचप्रसिद्धा. काञ्चीतु नान
त्यस्याः भूम्युचित विभवभूषणा भूतलं बोध्यम् । कस्याश्चित्तर
ज्यते. काञ्चीन्तन्नाम्नीं नगरीं तदुक्तं हस्तिगिरिमाहात्म्ये क
म तेन तत्राञ्चितोहरिः।अतःकाञ्चीतिविख्याता पुरीपुण्यवि
त्नमेखलां द्रक्ष्यसि आलोकिष्यसे तामेवविशिनष्टि यस्यामिति
द्वन्द्वातीतः।अशनायापिपासे शोकमोहौ जरामृत्यू सुकृतदु
द्वन्द्वम् । एवं सुकृतदुष्कृते सर्वाणिच द्वन्द्वानीतिकौषीत
शब्देन निर्देशात् । काम्यन्तइतिकामाः कल्याणगुणाः सत्य
ः यस्यतादृशः । पुरेशरीरे शेतइतिपुरुषः पुरसंज्ञे शरीरेरि
पुरुषोहरिः। शकारस्यषकारोयं व्यत्यासेन प्रयुज्यतइतिनिरु
उकार व्यत्ययोप्युपलक्षितः । अनेन सर्वशरीरकत्वमुक्तं । स
ः नारायणइत्यर्थः भगवानितिशब्दोयं तथापुरुषइत्यापि
वर्तेते वासुदेवेसनातन इतिस्मरणात् । प्रसिद्धिश्चास्य विश्वमे
ः पूर्णं पुरुषेण सर्वमित्यादौद्रष्टव्या । द्वन्द्वातीतइत्यनेन नि
षत्वं सत्यकाम इत्यनेन कल्याणगुणाकरत्वं पुरुषइत्यनेन
तद्गतदोषास्पृष्टत्वञ्चसूचितम् । हस्तीतिशैलो हस्तिशैलः

थाभूतस्सन् तदुक्तं । दिङ्नागैरर्चितस्तस्मिन् पुरानारायणः प्र
तगिरिर्नामख्यातिरासीन्महागिरेरिति । तेनगिरेरपि हस्तिसंज्ञे
अत एव हस्तीश सर्ववचसामवसानसीमेति पूर्वाचार्यप्रयोगः
शैल इतिवा यस्यां पुर्यां नित्यंसर्वदानिहिते न्यस्ते नयने नेत्रे ये
भ्रसन् तां नित्यं कटाक्षविषयीकुर्वन्सन्नित्यर्थः दृश्यते खलु अ
खलु जनैरितिशेषः अर्चारूपेणेतिभावः दृशेः कर्मणिलट् ॥ वे
तीरे पुण्यकोटयां हरिस्स्वयम् । वरदस्सर्वभूतानामद्यापि परि
गादि प्रसिद्धिः खल्वित्यनेनद्योतिता । अन्यत्र हस्तिनां गजानां । इ
स्याप्युपलक्षणं संबन्धीयः शैलः तमधिवसतीतिताद्दशः महाशै
र्यः अनेन विविक्तदेश सेवित्वमुक्तम् । द्वन्द्वं शीतोष्णादिरू
अनेन शीतोष्णादिसहत्वं उक्तं द्वन्द्वातीतोविमत्सर इतिस्मरणात
ब्रह्मकामयतइति सत्यकामः परब्रह्मप्राप्तीच्छुः ततोन्यत्र वितृष्णाइ
सः उपासकतया प्रसिद्धः पुरुषः अधिकारीचेतनः यस्यां मे
नित्यं सदासंभवकालइत्यर्थः निहितनयनः निक्षिप्तचक्षुः अने
अन्यत्र आक्रष्टुमशक्यत्वं द्योतितम् दृश्यते जनैरितिशेषः। सर्वे
श्यत्सु त्यक्तलज्जाभयः लोकवेदविरोधमप्य विगणय्य मेखलामे
तिभावः ॥ अनेन लोकोत्तरो मेखलायाहारिभावोऽभ्यज्यते ॥ यः
क्षे भूमेः भूदेव्याइत्यर्थः तदानित्यः अनवरतः सङ्गीतः सम्यग्गीत
गाइत्येवार्थः । उत्तरार्धेपि हस्तिशैलाधिवासी द्वन्द्वातीतः सःपुरु
ख्यः यस्यां भूदेव्या मेखलायां नित्यं निहितनयनः अतएवसत्य
तः कामः अभिलाषः यस्य तथाभूतस्सन् दृश्यते खल्वित्यर्
तुताप्रस्तुतयोर्नगरी मेखलयोर्योगपद्येन वर्णनात्प्रकृताप्रकृतगोच

तामासीद न्प्रणमनगरीं भक्तिनम्रेणमूर्ध्ना
जातामादौ कृतयुगमुखे धातुरिच्छावशेन ।
यद्वीथीनां करिगिरिपते र्वाहवेगावधूतान्
धन्यान्रेणून् त्रिदशपतयो धारयन्त्युत्तमांगैः ॥

श्लेषः । नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रय इतिल॰ नानारत्नैरुपचितगुणा मित्यादावभङ्गः नित्यसङ्गीतनादामित इतिसंक्षेपः । किञ्च नानारत्नैरित्यादिना समृद्धिमद्वस्तुवर्णन॰ मित्यादिना श्लाघ्यचरितस्यान्याङ्गतया वर्णनाच्चोदात्तद्वयं लक्ष॰ भूमेरुचितविभवमित्यत्रसापेक्षत्वेपि गमकत्वात्समासः तदुक्तं हवाक्येन समानार्थकताभवेत् । असौ समासोगमकस्सापेक्ष इति । द्वन्द्वातीतइत्यत्र द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमण य॰ गाभि व्यक्तिष्वितिसूत्रेण अभिव्यक्तौ निपातितो द्वन्द्वश॰ न्तसहचरिततया लोकविज्ञातत्वमभिव्यक्तिः । सत्यं का॰ शीलिकामीत्यादिना अणोपवादोणप्रत्ययः ॥ नानानेकोभ॰ रत्नं स्वजातिश्रेष्ठेपीति. तौर्यत्रिकं नृत्तगीतवाद्यं नाटयमिदंत्रयां सम्यग्गीतेतुसङ्गीतं न्यायारम्भेप्रसिद्धके । तूर्याणान्त्रितये॰ र्णवः । काञ्चीस्यान्मेखलादाम्निप्रभेदे नगरस्य चेत्युभयत्रापि

अथ तान्नगरीं प्रणमेरित्याह । तामिति । आदौ पुराकृत तस्यमुखे प्रारंभे धातुः चतुर्मुखस्य इच्छायास्सङ्कल्पस्य वशेन जातामुत्पन्नां । यद्यपि विश्वकर्मणा काञ्चीनिर्मितेति दृश्यते रिच्छायाएवतत्रापि प्रयोजकत्वान्नदोषः अनेन महनीयत्व अतिशयोव्यज्यते । तां पूर्वोक्तां नगरीं काञ्चीं आसीदन्

तन्नोभवन्निति यावत् भक्तिः प्रीतिविशेषः (महनीयविषये प्रीति
च्यते) तयानम्रेण प्रह्वेण नतु नमितेन मूर्ध्ना शिरसा नवाङ्मा
मनोमात्रेणेतिभावः। प्रणम प्रणामं कुर्वाणमुप्रह्वत्वे कर्तरिलोट्।
ामान्तरायोगात् मूर्ध्नेत्युक्तम् । अन्यथा विष्णोरायतनं दृष्ट्वा
मेत्तुयः । तस्यवृश्चन्तिमूर्धानं शतधायमकिङ्कराः इत्युक्तन्यायेन
पादितिभावः । प्रणामेहेतुमाह, यदिति तिस्रः उत्पत्तिस्थिति
दशाः वयोवस्थाः येषान्ते त्रिदशाः रूपं बिभ्रति सौमित्रे पञ्चविं
म्।इत्युक्त्या. सदापञ्चविंशतिवार्षिका नतुबाल्यादिमन्तइत्यर्थः
चतुर्मुखाद्याः नकेवलं त्रिदशाः किन्तु तत्पतयोपि सर्वेइतिभावः
तेः हस्तिशैलनाथस्य वरदराजस्य वाहः वाहनं गरुत्मानित्यर्थः
अवधूतान् कम्पितान् विकीर्णानित्यर्थः अतएवधन्यान् पुण्य
: काञ्च्याः वीथ्यः पदव्यः रथ्याइतियावत् तासां रेणून्
माङ्गैः शिरोभिः नतुयैः कैश्चिदङ्गैः धारयन्ति वहन्ति। धृञ्
यस्माद्धावादिकात्स्वार्थेणिच् तद्वीथीरेणूनामपीदृशमहनीयत्वे
यत्वं किमुवक्तव्यमितिभावः॥ * अत्र प्रणमेति वाक्यार्थं प्रति
त्यार्थस्य हेतुत्वात्काव्यलिङ्गम् । धन्यत्वं प्रति वाहवेगावधूत
ाङ्गधारणं प्रतिधन्यत्वस्य च हेतुत्वात्काव्यलिङ्गद्वयम्॥ त्रिदश
वशेष्यस्य सर्वोत्कृष्टा अपिधारयन्तीत्यभिप्रायकतया परिकरा
त्तमाङ्गैरित्यत्रापि उत्कृष्टै रङ्गै रित्यभिप्रायकतया परिकराङ्कुर
। * आसीदन्नित्यत्र आङ् पूर्वकात्सदेश्शतारिपाघ्राध्मेत्यादिना
। * मुखंप्रधाने प्रारम्भइतिधन्यं पुण्यवति त्रिष्विति. वीथीपङ्क्तौ
पकान्तरवर्त्मनोरितिचभेदिनी. त्रिष्वधीनेवशोवाञ्छा प्रभुत्वा

मन्दाधूता त्तदनुमहितो निस्सृतश्चूतषण्डात्
पार्श्वेतस्या: पशुपतिशिर श्चन्द्रनीहारवाही ।
दूरात्प्राप्तं प्रियसखमिव त्वामुपैष्यत्यवश्यं
कम्पापाथ: कमलवनिका कामुकोगन्धवाह: ॥

नाइति. वाहोनायानेश्वे वृषभेपिचेतिचरत्नमाला उत्तमाङ्ग
ग्रमर: ॥

कम्पामारुतस्त्वां परिचरिष्यतीत्याह ॥ मन्देति ॥ तदनु
न्तरं तस्या: काञ्च्या: पार्श्वे पश्चभागे मन्दम् शनैर्यथा
: समन्तात्कम्पितात् चूतानां आम्रवृक्षाणां षण्डात् व
ःकदम्बे षण्डमस्त्रियामित्यमर:) निस्सृत: निर्गत: । अनेन ग
। पशुपते: एकाम्रेश्वरस्य शिरसिशीर्षे यश्चन्द्र: तस्य व
: तं वहतीति तथाभूत: । ताच्छील्ये णिनि: तुहिन
हारात् चन्द्रकिरणेषु तुहिनमस्तीति चन्द्रनीहारेत्युक्ति: ।
ग्रतम् । कम्पाया: तन्नामकस्य स्रोतो भेदस्य पाथसि अ
वनिका पद्मवनी तस्या: कामुक: कामयिता तत्सम्बन्धं
स्य पाथस्सम्बन्धित्वोक्त्या कमलानां अम्लानत्व सौरभा
ध्यते अनेन मारुतस्य सौरभ्यं द्योतितं अत एव मन्दित
धं वहतीति गन्धवाह: मारुत: दूरात् दूरदेशात् प्राप्तं
शिष्यादरणीयत्वं द्योतितं प्रियश्चासौसखाच प्रियसख:
त्प्राप्तं भवन्तम् अवश्यं नियतं उपैष्यति तव समीपम्
कमलवनिका कामुकेत्यनेन कमलवनिकाया उत्तमनारि
गृहस्थत्वश्चव्यज्यते ॥ अत्र मारुते वर्ण्यमाने तत्सा

र्णस्तोमै रिवपरिणता सप्तभेदैर्महौघैः
मान्यामध्ये नगरमभित स्सेविता देवताभिः ।
वच्छस्वादु प्रसरसुभगा स्वामिनीवःकवीनां
ेगासंज्ञां वहतिमहतीं वल्लभापद्मयोनेः ॥ ॥२६॥

तिथिसत्कारप्रवणस्य कस्यचिद्गृहस्थस्य वृत्तान्तः प्रतीयत
क्तिः ॥ प्रियसखमिवेत्यत्रोपमा ॥ (२८)

युष्मत्स्वामिनी नदीरूपेण प्रवहतीत्याह । वर्णेति ॥ मान्या
र्वैरितिभावः कवीनां कवयितॄणाम् जलचरपक्षिणाश्च । वः
मिनी ईश्वरी वाग्देवतात्वादितिभावः पद्मयोनेः कमलसम्भवस्य
ता वल्लभा सरस्वतीत्यर्थः (कर्त्री) वर्णानां अकारादीनां
हैरिव सप्तसप्तसङ्ख्यावन्तः भेदाः प्रकाराः येषान्तैः । महान्त
प्रवाहाश्च तैः वर्णस्तोमानां सप्तभेदा अकारादिः क च ट त प
श्च । महौघानान्तु शुक्तिका कनकासृप्रा कम्पा पेयाचमञ्जुला।
सप्तैताः कीर्तितास्सप्त नामभिरित्युक्ताः । परिणता परिणामं
तरं प्राप्तेति यावत् नगरस्यमध्ये मध्ये नगरं अभितः उभ
येपीत्यर्थः देवताभिः अर्चारूपाभिः परदेवताभिः अर्चापेक्षं
वेता आश्रिता। वेगवत्युत्तरे तीरे पुण्यकोट्यां हरिस्स्वयमिति।
भागं वेगवत्याश्च दक्षिणं । कामादधिवसञ्जीयात् कश्चिद
ति चोक्तरीत्या पार्श्वद्वयेपि भगवदर्चाभिस्सेवितेतिभावः ।
लिः स्वादुः मधुरश्च यः प्रसरः प्रवाहस्तेन सुभगामनोहराच
म् पूज्याम् वेगा वेगवतीतिसंज्ञां नाम वहति धारयति ॥ वर्ण
त्रोपमा । मध्येनगरमित्यत्र पारेमध्यइत्यव्ययीभावः । अभित

तीर्थेपुंसां शमितकलुषे तत्रसारस्वताख्ये
स्नात्वासार्धं मुनिभिरनघै स्सम्यगुल्लासितांगः ।
विश्वंचित्ते विगतरजसि व्यञ्जयन्तीमशेषं
वक्ष्यस्यंत र्बहिरपिपरां शुद्धिमक्षेपणीयाम् ॥

इत्यत्र पर्यभिभ्या श्चेत्युभयार्थेतसिल् ॥ भेदोद्वैधे विशेषेस्यादुप
णाइतिमेदिनी । ओघःप्रवाहो निवहइतिकोशः ॥

अथ तत्र अन्तर्बहिश्चशुध्यर्थं स्नायाइत्याह । तीर्थइति ॥
पुंसां पुरुषाणां जीवानामित्यर्थः अस्य कलुषेणान्वयः श
कलुषं वृजिनं येन तथोक्ते सापेक्षत्वेपि गमकत्वात्समासः ।
सारस्वतं तदिति आख्या नाम यस्य तथोक्ते तीर्थे ऋषि
सत्यव्रताख्येस्मिन् क्षेत्रे सकृदपित्वयि । स्नायात्ससर्वपापेभ्यो
संशयः । इत्युक्तामुनिभिस्तुष्टावसिष्ठाद्यैस्सरस्वती । नदीमध्या
शालामुपागमदित्युक्ते वेगवतीतीर्थइत्यर्थः अनघैः निर्दोषैः
शीलैर्महद्भिः (मननंनामोपासनालम्बनस्य पुनः पुनः संशी
साकं स्नात्वा आप्लुत्य अनेन सद्भिरेवसहासीत सद्भिः कु
सद्भिर्विवादं मैत्रींच नासद्भिः किञ्चिदाचरेदिति शास्त्रार्थः
ग्यथा तथा उल्लासितानि उल्लासं प्रापितानि अङ्गानि अ
तादृशस्त्वम् । यद्वा मुनिभिरिति मध्यमणिन्यायेनोत्तर त्राप्य
मुनिभिः उल्लासितानि सादरपरिमार्जनेन शोधितानि प्रहर्ष
त्यर्थः अतएव विगतंरजः रजोगुणः यस्मात्तथोक्ते नीरजस्त
धिक इतियावत् । संभाषादर्शनंस्पर्शः स्मरणं कीर्तनंनतिः
किलैतानि साधूनामितिशुश्रुम । इत्युक्त्वा तेषां स्पर्शस्य प

तस्यास्तीरे सरसिजभुव स्सौम्यवैतानवेदिः
दिव्यंकुर्व न्द्रमिडविषयं दृश्यतेहस्तिशैलः ।
यस्योपान्ते कृतवसतयो यापयित्वाशरीरं
वर्तिष्यन्ते वितमसिपदे वासुदेवस्यधन्याः ॥ ॥३१॥

त्ते मनसि अशेषं कृत्स्नं विश्वं प्रपञ्चं व्यञ्जयन्तीं प्रकाशयन्तीं यते ज्ञानमित्युक्तेः । परां उत्कृष्टां अक्षेपणीयां केनाप्यनिवार : नैर्मल्यं अन्तः अन्तःकरणे बहिः बाह्येषु करणकळेबरेष्वपि रयिष्यसि । वहतेर्लृट् । तीर्थस्नानमुनिकरस्पर्शाभ्यां निर्मला भविष्यतीतिभावः ॥ * अत्र शमितकलुष इतिविशेषणस्य भिप्रायकतया परिकरः ॥ * निपानागमयोस्तीर्थं ऋषिजुष्ट ग्यमरः॥ (३०)

स्यास्तीरे हस्तिशैलोदृश्यतइत्याह । तस्याइति ॥ हे सौम्यम ा वेगवत्यास्तीरे उत्तरतटइत्यर्थः सरसिजातं सरसिजं तस्मा त्पद्यत इतिसरसिज्भूः तस्य ब्रह्मणः वितानस्य यज्ञस्येयं चसावेदिश्च नागाद्रिं परिसन्तक्ष्य निम्नोन्नतविवर्जितम् । तच्छृङ्ग । चकारोत्तरवेदिकामित्युक्ते ब्रह्मवितानोत्तरवेदिभूतइत्यर्थः करिगिरिः द्रमिडइतिविषयो देशस्तं दिविभवो दिव्यः तं ाभिव्यक्तिमापन्न इत्याद्युक्तया स्वस्यदिव्यत्वेन स्वाश्रयं द्रमिड व्याकुर्वन्नित्यर्थः दृश्यते विलोक्यते तमेव विशिनष्टि । यस्य ःय उपान्ते अन्तिकप्रदेशे कृतारचिता वसतिः वासः यैस्ते ःयाः पुण्यवन्तः भगवत्प्राप्तिहेतुभूतसुकृतवन्तइत्यर्थःशरीरं वपुःय ापयित्वा इदञ्चकर्मकृतशरीरविषयं मुक्तावपि सशरीरत्वस्

संचिन्वाना तरुणतुलसी दामभिस्त्वामभिख्यां
तस्यांवेद्या मनुविदधती श्यामलंहव्यवाहम् ।
भोगैश्वर्यं प्रियसहचरैः कापिलक्ष्मीकटाक्षै
भूयश्श्यामा भुवनजननी देवतासन्निधत्ते ॥

त्वादितिध्येयम् । विगतं तमसः मूलप्रकृतेरिति वितमस्तस्मि
तिइत्यर्थः वसत्यसौसर्वत्र वसत्यस्मिन् सर्वमितिवा वासुः सर्व
तश्च वसत्यत्रेतिवैयतः । ततस्सवासुदेवेति विद्वद्भिः परिकीर्त्यत
नात् । वासुश्चासौदेवश्च वासुदेवः तस्य नारायणस्य पदे स्थाने
त्यर्थः वर्तिष्यन्ते स्थास्यन्ति अत्र वासकरणापेक्षया भवि
तु श्रीरामभद्र कथनापेक्षया । तेन केषांचित् पूर्वं
सुदेवपदवर्तने नदोषः । दृष्टा मामुपेत्यतुकौन्तेय पु
द्यतइत्याद्युक्त्या न पुनरावर्तिष्यन्तइतिद्योतितम् यद्यपि भगवं
स्य उपायोपकारकत्वं दिव्यदेशान्तरवाससाधारणम् । तथापि
रात्रंवा सप्तरात्रमथापिवा । निवसेद्यस्स सहसामुच्यते सर्वकिल्बि
ह्माणं प्रति भगवता वरदेन वरस्पदत्ततया अत्र अतिशयः
स्योपान्त इत्यादिकमुक्तमित्यनुसन्धेयम् ॥ * अत्र धन्यत्वं प्रा
त्तित्वस्य वासुदेवपदवर्तनं प्रति धन्यत्वस्यच हेतुत्वात्काव्यलिङ्ग
स...सिजेत्यत्र सप्तम्याजनेर्डइतिडः तत्पुरुषेकृतिबहुळमित्यलुक्
त्र पुंवत्कर्मधारयेति पुंवद्भावः । दिव्यमित्यत्र द्युप्रागपागुदक्
चिति भवार्थेयत्प्रत्ययः । वितमसीत्यत्र निरादयः क्रान्ताद्यर्थे प
मासः॥ *सौम्योज्ञेनात्रिष्वनुग्रे मनोज्ञे सोमदैवतइति वसतिस्स्य
सिपामित्याश्च निकेतनइतिचमेदिनी क्रतु विस्तारयोरस्त्री वितान

दे:परिष्कृताभूमिरिति. देशविषयौ तूपवर्तनमिति सुकृतापुराय
ञ्चामरः. (३१)

मनु हस्ति शैले कापि परदेवता सन्निधत्ते इत्याह । सञ्चि
याम् पूर्वोक्तायाम् वेद्याम् उत्तरवेद्याम् तरुणायाः यौवन
स्याः दामभिः मालाभिः (तुलस्या स्तारुण्योक्तया श्याम
ा) स्वाम् स्वकीयाम् स्वाभाविकीमित्यर्थः अभिख्यां शोभां
भामित्यर्थः सञ्चिन्वाना सञ्चितांकुर्वती उपचिन्वतीत्यर्थः
ामळम् नीलम् हव्यं वहतीति हव्यवाहः तं अग्निम् अनु
ुकुर्वती । इदञ्च तुरग सवन वेद्यां श्यामळो हव्यवाह इति
थनुरोधेन । शीतळमिति पाठे शीतल अनुष्णमित्यर्थः अनेन
ापि सर्वेषामाप्यायकत्वात् प्रसिद्धाग्निवैलक्षण्यम् द्योतितं ।
वजन्य रसश्च ऐश्वर्यम् जगन्नियन्तृत्वञ्च तयोः अर्थाद्भगवत्स
दशयोः) सप्तमी । प्रियाश्चते सहचराश्च प्रियसहचराः तैः
ां ऐश्वर्यावस्थायाञ्च भगवतः प्रियसहचरैरित्यर्थः सहचराः
ाया इतियावत् केचिदप्रियास्सन्त एव सहकारिणो भवन्ति
प्रियेति । केचित्प्रियाअप्यसहकारिणो भवन्ति तद्व्यावृत्तये
लक्ष्मीकटाक्षास्तु भगवतः सर्वास्वप्यवस्थासु प्रियतमास्सन्त
रिणोभवन्तीति भावः । अनेन श्रियैसमस्तचिदचिद्विधान
। अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोञ्जलिरित्याद्युक्तमनु
गाः श्रीदेव्याः कटाक्षैः अपाङ्गदर्शनैः भूयः अतिशयेनबहु
श्यामा श्यामला भुवनानां लोकानां जननी जनयित्री कापि
ञ्चरा देवता परदेवता संनिधत्ते सान्निध्यं कुरुते । अल

लक्ष्मीविद्यु ल्ललितवपुषं तत्रकारुण्यपूर्णां
माभैषीस्त्वं मरकतशिला मेचकं वीक्ष्यमेवं ।
शुद्धैर्नित्यं परिचितपद स्त्वादृशैर्देवहंसै
र्हंसीभूत स्सखलुभवता मन्ववायाग्रजन्मा ॥

[illegible]वनजननीत्यादिना परत्वं वेद्यांसन्निधत्त इत्यनेन सौलभ्यः
[illegible]म् ॥ अत्र श्यामळ हव्यवाहत्वेन संभावनायामभिसन्धावुत्प्रे[illegible]
[illegible]हव्यवाहस्य उपमानत्वाभिसन्धौ प्राचाम्मतेन अभूतोपमा
न तु हव्यवाहस्य श्यामळत्वासंबन्धेऽपि तत्सम्बन्धोक्ति[illegible]
[illegible]युत्थापिता उपमेति ॥ अनुविदधतीति तु उपमोत्प्रेक्षयो[illegible]
[illegible]तळमिति पाठेप्येवं ॥ किञ्च स्वतस्सिद्धस्य श्यामह्निम्नः [illegible]
[illegible]क्ष्मीकटाक्षै रुत्कर्षवर्णनादनुगुणालङ्कारः प्राक् सिद्ध स्वगु
गुणः परसन्निधेरितिलक्षणात्॥ सञ्चिन्वानेत्यत्र संपूर्वाच्चिनो
[illegible]नच् । अनुविदधतीत्यत्र अनुविपूर्वकाद्धातेः कर्तरिशता ।
[illegible]शब्दादीयसुनि बहोर्लोपो भूच बहोरिती कारलोपे भूइत्य
[illegible]भिख्यानामशोभयोरिति विष्टपं भुवनञ्जगदितिचामरः.

अथ मेचसदृशं भगवन्तम् वीक्ष्यमाभैषीरिति सहेतुकमाह [illegible]
त्र उत्तरवेद्यां लक्ष्मीरिव विद्युत् तटित् तया ललितम् रु[illegible]
[illegible]ग्रहो यस्य तथोक्तम् अनेन पुरुषं कृष्णपिङ्गलमित्याद्युक्तम्
स्य कृष्णपिङ्गलत्वं एतन्मूलकमिति ज्ञापितं पिङ्गलाम् हेममा[illegible]
[illegible]क्ष्म्याः पिङ्गलत्वश्रुतेः । करुणैव कारुण्यं तेन पूर्णं पूरितं अत्र
[illegible]द्युत्त्वरूपणेन कारुण्येऽनुक्तमप्यप्लवरूपणं गम्यते । मरतका[illegible]
[illegible]तं सेवमेचकं श्यामलं । यद्यपि मरतकं हरितमित्येव प्रसिद्धि

नणिरिति व्यवहारश्च तथापि गुणवत्तरस्य मरतकस्य रत्नवित्
लिम भूयस्त्वमवलम्ब्य मेचकत्वोक्तिः । अत एव घासश्याम
णीन् । शुकाङ्ग नीलोपल निर्मितानामित्यादयः प्रयोगाः ।
रं भगवन्तमित्यर्थः वीक्ष्यदृष्ट्वा माभैषीः मालसीः । तत्र हेतु
रेति स पूर्वोक्तो मेघः शुद्धैः धवळैः अन्यत्र अक्लेशैः अत एव
न्ति ज्ञानविषयीभवन्तीतित्वादृशास्तथोक्तैः उभयेषामपि शुद्ध
वः । देवानां हंसैः देवसम्बन्धिभिर्मराळैरित्यर्थः अन्यत्र हंस
श्रेष्ठाः देवानां हंसास्तैः नात्र निर्धारणे षष्ठी निर्धारणस्य त
र्यमाणस्यच योग एव तत्प्रसरात् किन्तु शेषे । नातो न नि
निषेधावकाशः । देवा हंसा इवेत्युपमित समासो वा देवश्रेष्ठा
त्तरपदेव्याघ्र पुङ्गवर्षभ कुञ्जराः । सिंह शार्दूल नागाद्याः पुं
चरा इत्युक्ते नागाद्या इत्याद्यपदेन हंसपदस्यापि गृहीतुमुचित
नेत्यसूरिभिरित्यर्थः नित्यम् सदा परिचितं परिशीलितम् पदं
यस्य अन्यत्र परिचिते सेतिते पदे पादौ यस्य तथोक्तः
संपद्यमानो भूतः हंसीभूतः अत एव भवताम् युष्माकं हंस
ः अग्रे पूर्वम् जन्म जननं यस्येति व्यधिकरण बहुव्रीहिः
अग्रजन्माखलु कुलकूटस्थः खल्वित्यर्थः । खल्वित्यनुनये ।
तामनुकूल व्यवसायः कूटस्थतयावतीर्णश्च । नातस्तस्माद्धेत
ः ॥ अत्र विषयभूत भगवन्निगरणेन मेघतयाध्यवसानात्
देनाप्रसिद्धमेघादुत्कर्षस्य वर्णनाच्चाधिकाभेद रूपकातिशये
श्च लक्ष्मीविद्युदित्येकदेश विवर्तिरूपकेण मरतकशिला मेचव
च्चोत्थापिता । किञ्च उत्तरार्धवाक्यार्थेन माभैषीरित्यस्य सम

सारास्वादी सवनहविषां स्वामिनस्तेसदेव:
शुद्धंचक्षुः श्रुतिपरिषदां चक्षुषांभागधेयं ।
अङ्गीकुर्या द्विनतममुता सारसंवादिभिस्त्वा
माविर्मोदै रभिमतवर स्थूललक्षैःकटाक्षैः ॥

व्यलिङ्गम् । तच्च शुद्धैरित्यादिश्लेषभित्तिकाभेदाध्यवसायम्
क्तयनुप्राणितमिति संक्षेपः ॥ कारुण्येत्यत्र चातुर्वर्ण्यादित्वा
पूर्णमित्यत्र कर्मणिक्तः वादान्तेत्यादिना निपातनात्साधुः मा
धातोः कर्तरिलुङ् नमाङ्योग इत्यट्प्रतिषेधः॥ हारभेदे विल
चारुणि त्रिष्विति रत्नमाला । पदं व्यवसितत्राण स्थान लक्ष
ष्विति । निषेध वाक्यालंकारजिज्ञासा नुनये खल्विति चामरः
अथ परीत्यदेवदेवेशं प्रणम्यात्मानमर्पयेत् । इत्युक्तप्रकारे
सदेवः कटाक्षैः अङ्गीकरिष्यतीत्याह । सारेति ॥ ते तव स्व
चतुर्मुखस्येत्यर्थः सवनस्य यज्ञस्य हविषां (वपादि) होतव्यद्र
स्थिरांशं आस्वादयतीति तादृशः ताच्छील्येणिनिः हविस
नित्यसापेक्षत्वात्समासः । अत्र सहस्रादित्यसङ्काशे विमाने
तिष्ठन्तं हविरश्नन्तं ददृशुस्तेदिवौकस इत्युक्ता कथानुसन्धेय
वेदानां याः परिषदोगोष्ठ्यः तासां स्त्रीलिङ्गेन कासाश्चिद्रम
प्रतीयते। शुद्धं निर्दोषं चक्षुः नयनं चक्षुरिन्द्रियभूतइत्यर्थः
त्कर्तृकस्य सर्वविषय साक्षात्कारस्य भगवदधीनत्वात् चक्षुष्ट्वं
कथं श्रुतीनां नित्यत्वे तासां सर्वविषयावगाहस्य भगवदधी
नाशङ्क्यम् । नित्यानामपि भगवन्नित्येच्छाधीनत्वमिति संप्रद
देव मनुष्याणां वेदश्चक्षुस्सनातन मित्युक्तरीत्या सर्वेषां चक्षु

मध्वासक्तं सरसिजमिव स्विन्नमालम्बमानो
देव्याहस्तं तदितरकर न्यस्तलीलारविंदः ।
देवःश्रीमा न्सयदिविहरे त्स्वैरमारामभूमौ
व्यक्तोबाल व्यजनवपुषा वीजयेस्तंत्वमेव ॥

पि चक्षुर्भूतइत्यर्थः । यथा पितृदेवमनुष्याः प्रमाणान्तरा गोच
विदेन पश्यन्ति प्रत्यक्षेणानुमित्याबापस्तूपायेनबुध्यते एवं
न तस्माद्वेदस्य वेदतेत्युक्तेः तथा वेदोपि प्रसन्नेन भगवता प
त्रः ॥ यद्वातासां सर्वविषयावगाहनशक्तिः चक्षुष्ट्वेनाध्यव
तुत्वाद्भगवतस्तत्वेन व्यपदेशः । श्रुतिपरिषदां चक्षुरित्यनेन त
मास्पदत्वं भगवति व्यञ्जयता परमतात्पर्यविषयत्वमुक्तं भवति ।
वेषां) नयनानां भागधेयं भाग्यं भाग्यपरिणामभूतइत्यर्थः
देवो भगवान् विनतं प्रणतं त्वां चतुर्मुखस्यौपवाह्यामितिभावः
न् मोद उन्मेषोयेषुतैः सादरोल्लासैरित्यर्थः अत एवामृतानां
सारैः धारासंपातैः संवदन्ते संवादं कुर्वन्तीतितादृशैः (संव
म्) अमृतासारसदृशैरितियावत् । अनेन जगदुज्जीवकत्वभोग्य
ज्यते । अत एवाभिमतानामभीप्सितानां वराणां प्रसादलभ
लक्ष्यैः वदान्यैः । अनेनास्य देवस्य वरदइतिनामसूचितम् ।
पाङ्गदर्शनैः अङ्गीकुर्यात स्वीकुर्यात् परिजनाविशेषेणेतिभाव
गवतश्चक्षुष्ट्वेन भागधेयत्वेन च रूपणाद्रूपकद्वयम् । अमृतास
रित्यत्रोपमा । सदृक्सदृशसंवादिसजातीयानुवादिन इति सं
गापि उपमावाचकेषुगणनात् । विनतमित्यस्य अङ्गीकारहेतुत्वा
तङ्गश्च । हविर्होतव्यमात्रेच सर्पिष्यपि नपुंसकमितिमेदिनी ।

परिषद्गोष्ठी सभासमितिसंसदइति. दैवन्दिष्टं भागधेयं विधिरिति. धारासंपात आसारइति स्युर्वदान्य स्थूलल प्रदे इतिचामरः। देवप्रसादे वरणे जामातरिवरः पुमाि

अथ प्रीतिसंहृष्ट सर्वाङ्गस्स्तुलाचापिविलोकयन् । नियतात्मायथोचितमित्युक्तरीत्या भगवत्प्रसादस्य फल इत्याह मध्विति ॥ सः पूर्वोक्तः श्रीमान् श्रियानित्ययुक्त स्विन्नं स्वेदयुक्तं अनेन सात्विकोद्भेदउक्तः अतएव आसक्तं संबद्धं. आसिक्तमितिपाठे आर्द्रीकृतमित्यर्थ मिवस्थितं देव्याः महादेवीनाम्न्याः श्रीदेव्याः । इत्यादिश्रुत्या लक्ष्म्या महादेवीनामत्वं । हस्तं पाि गृह्णन् तस्मादालम्बितात् इतरस्मिन्नन्यस्मिन्करे देव्याह लीलारविन्दं विलासार्थपद्मं येन तथोक्तस्सन् लीलाय घासादिवत्तादर्थ्यषष्ठ्यास्समासः इदं विहारान्तरस्याप्युप उपवनस्य भूमौ प्रदेशे स्वैरं स्वच्छन्दं यथा तथा विहरे चेत् तदा त्वमेव वालव्यजनं चामरं तस्यवपुषा रूपे स्सन् तदेवं वीजयेः वीजनेन परिचरेरित्यर्थः। यथा स्वै रविच्छेदोनभवेत्तथा वीजयेरितिभावः। त्वमेवेत्येवकारेण त्वामाभूदिति द्योतितम् यत्रयत्र चरेत्तस्मिन् वने त तत्रतत्रचचारोच्चैः पक्षौविस्तार्य पक्षिराडिति हस्तिगिरा छत्रात्मना गरुडइव वालव्यजनात्मनात्वमपि परिचरेरिति कीदाजगतिकुत्सनयोरिति धातोर्णिजन्तात्कर्तरि प्राय

*अत्र वालव्यजनवपुषेति अन्यधर्मस्य हंसे आरोप

जातप्रीति र्जनपदमथो मध्यमंलङ्घयित्वा
दूराल्लक्ष्य क्रमुकनिवह श्श्यामलान्याहिचोलान् ।
प्रत्युद्गच्छ न्मकरवलन स्तम्भितैस्सह्यजायाः
स्रोतोभेदै र्विविधगतिभि स्संविभक्तावकाशन् ॥३६॥

सिजमिवेत्यत्रोपमा । * मधुमद्येपुष्परसइत्यमरः. (३५)

ोळदेशं गच्छेरित्याह । जातेति ॥ अथो वरदराजसेवानन्तरं त्यनेनान्वयः जता उत्पन्नाप्रीतिः प्रमोदो यस्य तथोक्तस्सन् ाश्चीचोळदेशयोः) मध्यमवं जनपदं ग्रामसमुदायं लङ्घयित्वा ात् दूरं । लक्ष्याः दृश्याः । अनेन औन्नत्यं व्यञ्जितं । येक्रमु ाकूणान्निवहाः समूहाः तैः श्यामळान्कृष्णान् अनेन रमणीयत्व देकं व्यज्यते । प्रत्युद्गच्छतां (स्रोतसः) प्रतीपमुद्गच्छतां ात्स्यविशेषाणां वलनेन इतस्ततस्सञ्चारेण स्तंभितैः निरुद्धैः राणामतिस्थूलत्व दीर्घत्वादिकं व्यञ्जितम्) मकरवलयेतिपाठे ारः । अत एवविविधा बहुमुखा उत्कूलेतियावत् गतिः गमनं ह्ये तन्नामके पर्वते जाता सह्यजा कावेरी तस्याः स्रोतोभेदैः भैः संविभक्ताः संविभागं प्रापिताः अवकाशाः प्रदेशाः येषां (एतेन चोळावकाशानामारामादिसमृद्धया रामणीयकं व्यज्यते) निवासोजनपदश्चोळास्तान्देशविशेषान् याहि प्राप्नुहि । याप्रा मिहगतिः प्रार्थनायां लोट्॥*अत्र क्रमुकनिवह श्यामळत्वादि स्तुवर्णनादुदात्तम् । तच्च प्रत्युद्गच्छदित्याद्युक्ताद्भुतातथ्यवस्तुवर्ण त्यनुप्राणितमितिसङ्करः । अत्युक्तिरद्भुतातथ्य शौर्यौदार्यादि ालक्षणात् । लौकिकार्थमतिक्रम्य प्रस्थानं यत्रवर्ण्यते । तद

सन्ध्यारागं सुरभिरजनी सम्भवैरङ्गरागैः
केशैर्ज्योत्स्ना कलहितिभिरं पाळिकापीडगर्भैः ।
आबिभ्राणा स्सरसिजदृशो हंसदोलाधिरोहा
दाधास्यंते मदकलगिर स्तेषुनेत्रोत्सवंते ॥ ·

क्तिरितिप्रोक्तं गौडानां मनसोमुदइत्युक्तेश्च ॥ * दूरादित्यत्र दूर
न्यइतिपञ्चमी असत्ववचनोयम् मध्यममित्यत्र मध्यान्मइति भवा
मङ्गळानन्तरारंभ प्रश्नकात्स्न्येंष्वथोअथेति वाराटातुपूगःक्रमु
द्रेदाश्शिशुमारोद्रशङ्कवोमकरादयइति, कवेरकन्याकावेरीसह्यर्ये
ग्रेतिचामरः.

अथ तत्रारामादिषु विहरमाणा ग्रामरमणीर्द्रक्ष्यसीत्याह सन्
हंसतेषु चोलेषु सुरभिः सुगन्धिः या रजनी हरिद्रा संभवन्तीति
ःभि रजन्यास्संभवास्तयोक्तैः अङ्गानां रागैः अनुलेपनद्रव्यैः सन्
ां आरुण्यं पालिकाः क्रमुककुसुमानि ता एव आपीडः शेखर
ान्तैः केशैः कबरीभिरित्यर्थः ज्योत्स्नयाचन्द्रिकया कलहः ।
रामभद्रस्य प्रस्तावे प्रसंगे वृत्तान्तानुवर्णनरूपे प्रवणं आस
नाचतुष्पथे । त्रिषुतुक्रमनिम्नोर्व्यां प्रह्वेतत्परदक्षयोरिति रत्नम
अन्तः अन्तःकरणे तोषात् सन्तोषात् प्रहर्षादितियावत् । अ
पदं तोषस्य अकृत्रिमतया निर्भरत्वबोधनाय । एवमेव अन्तस्त
भट्टमुरारिः । अन्तर्मोदानुभवमसृणमितिभवभूतिश्च । सदृशं
वेदः तदध्ययनमितियावत् तत् यस्मिन् तत् सब्रह्म । वेद
ब्रह्मेत्यमरः, अत्र सदृशवचनस्य सहशब्दस्य स सखीत्यादिवत्

पश्यन्ती सा रघुपतिवधूस्त्वामशेषावदातं
प्रत्याश्वासादधिगतरुचिः प्राक्तनीवेन्दुलेखा ।
मत्सन्देशे तदनु सुमुखी सावधाना भवित्री
किं न स्त्रीणां जनयति मुदं कान्तवार्तागमोपि ॥ ॥

: वोपसर्जनस्येति वैकल्पिकस्सभावश्च । सब्रह्मच तत् चर्यं ञ्च
व्रतंचेति स ब्रह्मचर्यं । तुल्यवेदाध्ययनकं व्रत मित्यर्थः यद्वा ब्र
णाय चर्यं व्रतं ब्रह्मचर्यं समानं ब्रह्मचर्यं इति विग्रहे सम
ीतिसूत्रे समानस्येतियोग विभागात् समानशब्दस्य स भावे स
मेति भवति साधर्म्यमितिपर्य वसितोर्थः । अमृतस्य सु
महातरंगेणसह लब्धंप्राप्तं सब्रह्मचर्यं यैः तथोक्तैः उषसि
ं विकसतां अंभोजानां अरविन्दानां अन्तरंगैः सुहृत्तमैः तत
ावत् अपांगैः नेत्रान्तैः अपांगदर्शनैरितियावत् मानयेत् पू
मानं पश्येदित्यर्थः मानपूजायां संभावनायां लिङ् । अत्रप्रवण
ं प्रतिहेतुत्वात्काव्यलिंगं । मैथिलीति विशेष्यस्य माननोचित
प्रकत्वात् परिकरांकुरः।वदनकमलमित्युपमा।लहरीलब्ध सब्रह्म
नानां अन्तरंगैः इति च उपमे।अमृतलहरीत्यत्र अभूतोपमावा
न्म्लानं वदनकमलं उन्नम्येत्यनेन पूर्ववदननमनद्योतकेन व्यङ्ग
ातिमूलकध्यानात्मकाचिन्ताख्य संचारिणः शान्त्यभि व्यक्तेः भ
। चिन्तानुभावस्य अधोमुखत्वस्य निवृत्तिवर्णनात् । अत्राख
य विलयश्शान्तिरुच्यत इति भावशान्ति लक्षणं।उत्तरार्धेतु मित्र
मनःप्रसादरूपस्य हर्षस्य उदयः तदनुभावैः सविशेषणैः अपांगै

। इति भावोदयः।भावोदयस्स्यादुत्पत्तौ व्यंग्यायां व्यभिचारिण
क्षणं ॥ ॥

अथ त्वद्दर्शनाश्वासिता सीता त्वत्तोमत्सन्देश श्रवणावहिता भा
: । पश्यन्तीति ॥ तदनु अपांगदर्शनानन्तरं रघूणां रघुवंशज
ईश्वरस्य दशरथस्येत्यर्थः वधूः स्नुषा वधूर्जाया स्नुषास्त्रीचेत्य
न सीतायामत्यर्हत्वं व्यञ्जितं विमृश्ययुक्तिभिश्शश्वत् अर्थनि
रिति लक्षणात् सा सीता त्वां भवन्तं अशेषं निश्शेषं यथातथा
तथेत्यथः अवदातं शुद्धं सर्वाकारशुद्धमित्यर्थः अन्तर्बहिश्च शुद्धि
श्शुद्धिः मत्प्रस्तावासक्तत्वेन । बहिश्शुद्धिर्धावळ्यरूपा । प
ानेत्यर्थः अतएव प्राग्भवाप्राक्तनी पूर्वस्मिन् काले भवे
चिरमित्यादिना भवार्थे अन्यपाटयुल् तुडागमश्च । इन्दुलेख
व प्रत्याश्वासात् प्रतिसमाधानात् पूर्ववत् आश्वासप्राप्तेरि
त्व पुनरप्युच्छ्वसितत्वात् सूर्यकरैराप्यायितत्वादितियावत् । अत
ं हितायां सलिलमये शशिनिरवेः दीधितयो मूर्च्छितास्त मो
ान्तिदर्पणोदरनिहिता इव मन्दिरस्यान्तरिति । अधिगता प्राप्ता
त्वशोभा वार्ताश्रवणस्पृहावा, अन्यत्वदीप्तिः यया तथोक्ता ।
देभवा तनीयसी चन्द्रकला शुक्लप्रतिपदि सूर्यकरप्राप्तदीप्तिः
निमूल प्रहर्षकृत शोभाभवेदितिभावः । रुचिस्तुकिरणेकान्तौ श्च
लाषयोरिति रत्नमाला । अतएव शोभनंमुखं यस्यास्सा सु
ावदनाचसती मम सन्देशे वाचिके तच्छ्रवण इतियावत् साव
ानवती अवहितचित्तेतियावत् भवित्री भाविनी भविष्यतीतिय
र्थं अर्थान्तरन्यासेन दृढयति, कान्तस्य वल्लभस्य नतुकेवल

पश्चादेवं कथय भवती भागधेयेन जीवन्
कल्याणीं त्वां कुशलमनघः कोसलेन्द्रोनुयुङ्क्ते ।
येषु श्रेयो भवति नियतं तानि सर्वाणि सन्तो
लक्ष्या देव्यास्तवच भुवने लक्षणान्यामनन्ति ॥ ॥ ३

या: वृत्तान्तस्य सन्देशस्येतियावत् आगमः प्राप्तिरपिस्त्री
इणीनामितिभावः मुदं प्रीतिं नजनयति किं-नोत्पादयति किं
त्यर्थः किं निषेधे। किं कुत्सायांवितर्केच निषेधप्रश्नयोरपीति अ
ी। अत्र अपिशब्देन अन्यत्र वार्तागमस्य तादृशमोद जनकत्वा
तः । कामिजनव्यापारोहि इतरविलक्षण इतिभावः । अतए
उदासेन चेष्टाप्रतिरूपिकाहि कामि जनचित्तवृत्तिरिति । अत्र र
त्यस्य अशेषावदातत्वज्ञानंप्रति तस्यच प्रत्याश्वासमूलव
ातितस्याश्च सौमुख्यं सावधानीभवनंच प्रतिहेतुत्वात् काव्यलिं
न्येन विशेष समर्थनरूपार्थान्तरन्यासेन संकीर्यन्ते । अशेषा
न्तीत्यत्र काव्यलिंगमपि अशेषावदातशब्दार्थद्वयश्लेषभित्तिक
ायमूलातिशयोक्त्यासंकीर्यते इन्दुलेखेवेतिपूर्णोपमा अत्र अ
ात्वज्ञानकथनेन मतिः अधिगतरुचिरोक्त्या हर्षः साव
ोक्त्या औत्सुक्यंच इत्येषां भावानां पूर्वपूर्वानुपमर्देन संभव
भावसन्धिः । भावसन्धिस्तुभावानां तुल्यानां व्यंग्यता र
णात् ॥ ॥ ३
ाथ मत्कुशलं निवेद्य तस्याः कुशलप्रश्नं मयाकृतं कथयेत
देति ॥ पश्चात् सावधानी भवनानन्तरं नतु ततः पूर्वं । तथ
च्छद्मशंकाकळंकितास्या दितिभावः । प्रतीच्यां चरमेपश्चादित

एवंवक्ष्यमाण प्रकारेण कथयब्रूहि। कथनप्रकारमेवाह अवि
दुरितं यस्य तथोक्तः अतएव कोसलानां निवासो जनपदः को
इन्द्रः ईश्वरः रामभद्रः भवत्याः तव पूज्यायाबा भागधेये
हेतुनाजीवन् प्राणधारणं कुर्वन् सन् । विधेयस्याप्यस्य
शोद्दष्टासीतेत्यत्रैवबोध्यः । अन्यथा, दुष्करं कुरुतेरामो
काशिनीं। सीतां विनामद्दा बाहुर्मुहूर्त मपिजीवति। इत्युक्ता
धारणमेवदुर्लभ मितिभावः। कुतोमम तावद्भाग्यमित्यत्राह
शुभां अस्पृष्टाशुभगन्धामितियावत् कल्याणशब्दस्य ब
ङीप् अतएव त्वां कुशलं क्षेमं अनुयुङ्क्ते पृच्छति। प्रश्नोनुयो
चेत्यमरः। प्रोपाभ्यां युजेरयज्ञपात्रेष्वित्यत्रस्वराद्यन्तोप सृष्टादि
मितिवार्तिकात् अनुपूर्वाद्युजेर्नित्यमेवात्मनेपदं। अनुयुजेः पृच्छति
द्विकर्मकत्वं। कल्याणीं इत्युक्तमर्थमुपपादयति। येष्विति ः
सत्सुश्रेयः कल्याणं श्रेयोमुक्तौशुभेधर्मेऽतिप्रशस्तेचवाच्यवदिति
नियतं अव्यभिचरितं यथातथा भवति। उत्पद्यत इत्यर्थः। य
त्यधिकरणसप्तमी। भवति अस्ति मंगळानियेषुनित्यं सन्तीत्यर्थ
मदधीनानीतियावत्। सर्वाणि कृत्स्नानि तानि लक्षणानि सा
स्त्रोक्तानि चिह्नानि. सन्तः लक्षणाद्यभिज्ञाः विपश्चितः भुव
नातावेकवचनं लक्ष्म्याः देव्याः श्रीदेव्याः तव सीतायाश्च
त्तयाभेदनिर्देशः आमनन्तिपौनःपुन्येनवदन्तीत्यर्थः। आ
म्भ्यास इत्यस्मात् लट्. लोके सर्वाणि तानि लक्षणानि
ा त्वंचेत्युभयसंबन्धीन्येव सन्तीतिअसकृद्वदन्ति नान्यसंबन्ध
मनेन इमानिखलुपद्मानि पादयोर्यैःक्लिस्त्रियः । आ

[ष्यवधिरभवद्भूषणालेपनादि
यतिविभवादन्तरीपं दवीयः ।
र नयनयोर्वर्त्मनि स्थापयित्वा
ति कुशली देवि सख्यामुखेन ॥ ॥ ३२ ॥

नस्सह । इत्यारभ्य आधिराज्येभिषेकोमेब्राह्मणैः
लैरुक्तः इत्यन्तं सीतावचनं स्मारितं ॥ अत्र
। अनघत्वस्यहेतुत्वात्काव्यलिंगं कल्याणीमित्यस्य
त्परिकरः उत्तरार्धेन भागधेयसमर्थनात् काव्य
शब्दप्रमाणालंकारोस्थापितं । लक्ष्म्यादेव्यास्तव
गुणोत्कृष्टयालक्ष्म्या समीकृत्यसीतावर्णनात्तुल्य
ऱ्स्समीकृत्यवचोन्या तुल्ययोगितेति लक्षणात् ।
तेर्डवतुबितिसूत्रव्युत्पादितोभवच्छब्दः पूज्यवाच
ुवद्भावप्रसंगः अतएव अव्युत्पन्नंवाप्रातिपदिकं
मतुप्सूत्रेन्यास इत्युज्वलदत्तः । संबोध्यस्याधि
यतिदेवः — अस्मद्भाग्यविपर्ययाद्यदिपरंदेवोनजा
र्थः । ईदृशएवभवच्छब्दः आचार्यैः भवतामाधि
मयोक्ष्यते । यद्वासर्वनाम्नोवृत्तिमात्रेपुंवद्भावइतीष्टेः
ानादरः जामातादयितस्तवेति भवतीसंबन्धदृष्ट्या
नच परीचारान्प्रहृष्येमचेति भट्टपराशरपादसूक्त्या
यासंभोगचिह्नैस्तु कुपिताखण्डितामता । ज्ञाते
र्षाकषायितेत्यादिकं संगच्छतइतिसंक्षेपः॥ ॥३१॥
तवकुशलं पृच्छति किन्तुकुशली सन्देशमपि

वदतीति कथयेत्याह । यस्याइति ॥ हेदेवि पूज्येयस्याः र
यस्मिन् रामभद्रे मयिविषये भूषणं हारादिच आलेपनं अंगरा
यस्यसःभोगोपकरणविशेषोपि आदिनासौरभादिगृह्यते । व्यः
नेति व्यवधिः व्यवधायकः उपसर्गयोःकिरिति करणेवि
आसीत् । निरन्तरसर्वांग संश्लेषविरोधिलवशंकयातवदुः सहोभू
एनां तामित्यर्थः इदमेतददश्शब्दानपि तच्छब्दसमानार्थक
प्रत्युञ्जते । नियतेः दैवस्यविभवात् ऐश्वर्यात् स्वातन्त्र्यादितिय
अतिशयेनदूरं दवीयः दवीयश्चदविष्ठंचसुदूरे इत्यमरः। अन्तरी
स्त्रियामन्तरीपंयदन्तर्वारिणस्तटंइत्यमरः।नीतां प्रापितांअत्ररक्ष
पदानुपादानं नियतिविभवेसतियः कश्चित् अल्पोपिजन्तुः नेत
रावणादि रेवेतिनियतिविभवस्य प्राबल्यप्रदर्शनाय।अनेन हारे
कण्ठेस्पर्शसंरोधभीरुणा । आवयोरन्तरेजाताः पर्वतास्सरितो
दस्मारितं । नीतामेवमितिपाठे एवंनीतामितियोजना. एवमिति
रबोधकं तामितिशेषः । त्वां सरामः कुशली चेमीसन् प्रत्यास
सन्नोभवन्निव सन्निकर्षप्राप्नुवन्निवेत्यर्थः प्रत्यासत्तुमिवेतियावत्
भावेमुखेनवदनस्या संभवादितिभावः लक्षणहेत्वोरितिशता ।
नयनयोः लोचनयोःवर्त्मनि अध्वनिस्थापयित्वास्थितांकृत्वापुरत
निरन्तरभावनावशेनेतिभावः । सख्यासुहृदामयामुखेनवक्त्रेण
सुहृद्रूपवक्त्रेणेत्यर्थः तदवयवभूतएवाहं नान्य इतिभावः । उ
यथाश्रुतवादित्वं व्यंजितं । एवं वक्ष्यमाणप्रकारेण वदति अः
मानसामीप्ये वर्तमानवन्निर्देशः वक्ष्यतीत्यर्थः । एवं कथयेति
अत्र प्रत्यासीदन्निवेतिफलोत्प्रेक्षा । सख्यामुखेनेतिरूपकं । स

लातीतप्रणयविवशं भावमासेदुषोर्नौ
ोगारम्भे क्षण इवगता पूर्वमालिङ्गनाद्यैः ।
प्रत्येषा सुतनु शतशः कल्पनासङ्गमैस्ते
वन्तादीर्घैरपि शकलिता शर्वरी नापयाति ॥ ॥ ३३ ॥

स्थापनस्यहेतुत्वात्काव्यलिंगं ॥ ॥ ३२ ॥

तेशच्याः क्लेशमित्यन्तैः चतुर्दशभिः श्लोकैः स्वस्यवदनप्रका
वद्वियोगादारभ्य सर्वासुरात्रिषु ईदृशीमयावस्यानुभूयत इति
ाति ॥ शोभनातनूः यस्याः तस्यास्संबुद्धिः हेसुतनु शोभनमूर्ते
तनुस्तनूरित्यमरः । समासान्तविधेर नित्यत्वात् नद्यृतश्चेतिकब
आलंबनगुणोरूपयौवनादिःव्यंजितः।याशर्वरीजातावेकवचनं
तु प्राक्संश्लेषावसर इत्यर्थः वेलांमर्यादां अतीतः अतिक्रान्तः
उन्मर्यादइत्यर्थः यः प्रणयः रतिभावस्यावस्थाविशेषः तेन
ा परांकाष्ठामापन्नामित्यर्थः भावं मनोविकारविशेषं रतिनामानं
मित्यर्थःरतिर्नामइच्छाविशेषः।यूनोरन्योन्यविषयास्थायिनीच्छा
ं लक्षणात्. तस्याश्च षडवस्याः अंकुर पल्लवकलिकाप्रसून
ागियं क्रमतः । प्रेमामानः प्रणयः स्नेहोरागोनुरागश्चेत्युक्ताः ।
कलिकावस्थापन्नः बाह्यान्तरोपचारैर्यत् प्रेममानोपकल्पितैः।
चविस्रंभसोयं प्रणयउच्यतइति उक्तलक्षणः तस्यचवेलातीतत्वं
न तदुत्तरभाविस्नेहरागानुरागावस्यापत्याउत्कटत्वं । रतिभाव
ा अंकुरावस्थामारभ्य उत्तरोत्तरं सामग्रीवशेन उत्कृष्यमाण
नभोगावस्थामापद्यत इतिभावः।अनुरागस्तु रागएवस्वसंवेद्यदश
ाशितः । यावदाश्रयवृत्तिश्चेत् अनुरागइतीरित इत्युक्तलक्षणः

रागलक्षणन्तु दुःखमप्यधिकंचित्तेसुखत्वेनैवरज्यते । येन स्ने
रागइति कथ्यतइति । स्थायिभावलक्षणन्तु अवस्थिताश्चिरं
श्चानुबन्धिभिः । वर्धितायेरसात्मानः ते स्मृतास्थायिनोबुधैरि
त्तेपः । आसेदुषोः प्राप्तवतोः आसेदुषीच आसेदिवांश्चेतिवि
येत्येकशेषः आङ् पूर्वकात् सदेः भाषायां सदवसश्रुव इति
लिटिक्वसुः । नौ त्वंचाहंच आवां तयोः आवयोरित्यर्थः त्यद
परशेषः त्यदादितश्शेष इति पुंलिंगशेषश्च अतएव आसेदुषोरि
अनन्वादेशेपिवैकल्पिकोनावादेशःभोगस्य संभोगस्य कामोपच
कामस्त्रीपुंसयोस्सुखं । सुखमानन्दसंभेदः परस्परविमर्दजः ।
दानन्दकारकं कर्मकथ्यत इत्युक्तलक्षणस्य आरंभे उपक्रमए
परिरंभः आद्यं आदौभवं येषान्तैः व्यापारैः क्षणइव त्रिंश
कालइव गतायाता विरतेत्यर्थः नतु गमितातस्या एवं अपय
भावः येत्यनुवादेनसर्वतत्त्वयापिविदितमेवेतिव्यज्यते । अष्टादः
काष्ठात्रिंशत्तुताःकला । तास्तुत्रिंशत्क्षणः इत्यमरः । लघ्वच्च
निमेषः परिकीर्तितः । इतिनिमेषलक्षणं । घटिकापिकल्पेवाभू
क्षणमिवगतेतिपाठे क्षणमित्यत्यन्तसंयोगे द्वितीयाक्षणमात्र इवे
मात्रेणेतियावत् एषा सेत्यर्थः शर्वरीरात्रिः संप्रति इदानीं त्व
इत्यर्थः चिन्तया आध्यानेन इष्टानभिगमाध्यानं चिन्ताशून्य
इत्युक्तलक्षणेन दीर्घैः आयतैः नतु पारमार्थिकैरिवपरिमितका
अनन्तैरित्यर्थः शतं सहस्रमयुतं सर्वमानन्त्यवाचकमित्युक्तेः
देत्यादिनाशस् । ते तव कल्पनासंगमैः कल्पितैस्संभोगैः नतु
णकलिता शकलानिकृतापि खण्डितापीत्यर्थः नापयातिनव्य

अपिरालयः संभोगारंभस्याप्यपर्याप्ताः क्षणकालइवगताः
चेन्ताकल्पितैः अनन्तै स्वत्संभोगैः बहुधाविभक्ताअपिनाप
वियोगस्य महिमेतिभावः अवशकलितेत्यस्य संचूर्णितेत्यर्था
णामुपालंभोपिव्यज्यते । अविशकलितेत्यपिपठन्ति तदा
तेत्यर्थः अत्र आलिंगनाद्यैः कल्पनासंगमैरित्याभ्यां बाह्या
उक्ते तदुक्तं वात्स्यायनीये बाह्यमाभ्यन्तरंचेति द्विविधं रतमु
ाद्यं चुंबनाश्लेषनखदन्त क्षतादिकं । द्वितीयन्तुरतंसाचात्
तं मतमिति। अत्ररात्रेः चणवद्गतत्वा संबन्धेपि तत्संबन्धोक्तेः
योक्तिः । उत्तरार्धेतस्याः अपयानसंबन्धेपि तदसंबन्धोक्तेरति
: । पूर्वोत्तरयोः रात्र्योर्भेदेपि अभेदोक्तेरतिशयोक्तिश्च। शर्वरी
ननेन जागरावस्था व्यंजिता। अत्र सुतन्विति आलंबनोद्दीपन
प्रणयविवश मित्यादिना व्यंजितानां विविक्तदेशवासादीनां
ावानां आलिंगनाद्यैरित्यनुभावानां भावमितिस्थायिनः तद
ात्विकसंचारिणांच प्रतीतेः सीतारामयोः संभोगश्रृंगारोऽ्य
रार्धे रामभद्रस्य विप्रलंभश्रृंगारः। यद्यपि किमपि किमपिमन्दं
योगात् अविरळितकपोलं जल्पतोरक्रमेण, अशिथिलपारिरंभ
दोष्णोः अविदितगतयामा रात्रिरेव व्यरंसीत् इत्यादाविव
मुखेनैव रसभावप्रत्यायनं उचितं नप्रणयादिपदो पादानेन।
िचिदनुभावानां रसान्तरसाधारण्येन झटित्यभिमत प्रतीतिः
ा उन्मादावस्थस्य रामभद्रस्यायमुक्ति प्रकारइति वानतदादृत
व्यं ॥ ॥ ३३ ॥

20

उद्दामैस्ते कुचकलशयोरूष्मभिर्निर्जितेन
छिद्रं लब्ध्वा विरहसमये तत्क्षणादुन्नतेन ।
कुन्दामोदैस्सुरभितदिशा गन्धवाहेन दैन्यं
सम्प्राप्तोऽहं सह सरसिजैस्त्वन्मुखाम्भोजमित्रैः ॥

अथ सीतावियोगादारभ्य एतावताकालेन तत्तदृतुष्वनुभूतां वक्ष्यन् आदौ वियोगारंभानन्तरं शिशिर समयानुभूता मवस्था उद्दामैरिति ॥ उद्गताः दामायाः उद्दामाः निरर्गळाः अधिकाः तैः डाबुभाभ्यामिति दामन् शब्दाड्डापि निरादयः क्रान्ता समासः । यद्वा अच्प्रत्यन्ववपूर्वादित्यत्र अजितियोगविभागात् म्नइति विग्रहे समासान्तोच् प्रत्ययः । उद्दामोबन्धरहिते स्वतन्‍ सीतिमेदिनी । ते मत्प्रियायास्तव इदं विरहेष्यन्वेति । कुच स्तनकुंभयोः ऊष्मभिः उष्णैः कतृभिः नतुमया । ग्रीष्मोष्मबा इति रत्नमाला । कूपोदकंवटच्छाया तांबूलं (गृहान्तः)तरुणीस्त काले भवेदुष्णं उष्णकालेच शीतळं । इत्युक्त्या शिशिरपितये निर्जितेन पराजितेन मत्कृत इतिभावः । अतएव विरहसमये सरे छिद्रं अवकाशं लब्ध्वा प्राप्य तदाकुच कलशोष्म विरहाति तत्क्षणात् तस्मिन्नेवक्षणे उत्तरक्षण इतियावत् उन्नतेन कुन्दानां विकाराः पुष्पाणि कुन्दानि माध्यकुसुमानि तेषां आ मळ विशेषैः सुरभिताः सुरभयः कृताः दिशः काष्ठाः येनतेन स्सोति निर्हारि सुरभिर्घ्राणतर्पण इतिचामरः । अनेन ग शैशिरत्वं सूचितं गन्धं वहतीति गन्धवाहः मारुतः गर्वांश्च। गन्धोगन्धक आमोदेलेशेसंबन्ध गर्वयोरिति विश्वः । अहं ल

ाध्वीदिग्वैर्विरहिवनितास्वादुलुब्धैरमोघै
ावृण्वन्तं कुसुमधनुषश्चित्रपुङ्खैर्दिगन्तान् ।
ीतापार्श्वे न भवतु भवानित्यवोचद्वसन्तं
ामस्त्रासादनमितधनु र्मैळिना संनतेन ॥   ॥ ३५ ॥

त्रः त्वन्मुखांभोजस्य त्वद्वदनारविन्दस्य मित्रैः सुहृद्भिः तत्तु
ा । सरसिजैः अरविन्दैस्सहदैन्यं दीनतां संप्राप्तः सम्यक्
ार्जरितैःपत्रैः शीर्णकेसरकर्णिकैः । नाळशेषैः हिमध्वस्तैर्न
ताकरा इत्युक्तरीत्या हेमन्त इवशिशिरेपि हिमप्राचुर्येण पद्मा
ाप्तेः सरसिजैस्सहेत्युक्तं । अनेन त्वद्वदनसादृश्यदर्शन माधि
ीदितिव्यज्यते । त्वत्कुचकलशोष्मभिर्मत्कृते पूर्वं निर्जितः
ि त्वदसन्निधाने त्वदीयं मां त्वन्मुखतुल्यानि सरसिजानि
भावः॥अत्र गन्धवाहवृत्तान्ते वर्ण्यमाने तत्सारूप्यात् कश्चित्
्य तेषु पराक्रमितुमशक्तस्य तद्वियोगदशायां तदीयेषु पराक्र
वृत्तान्तः प्रतीयत इतिसमासोक्तिः । मुखांभोजमित्रैरित्यत्र
खांभोजस्य उपमानत्वोक्तेः । सरसिजैस्सहेत्युक्त्यासहोक्तिः ।
ाहभावश्चेद्भासते जन रंजनइति लक्षणात् । बलवतानिर्जितस्य
तीपाचरणवर्णनात् प्रत्यनीकालंकारः । प्रत्यनीकं बलवति
ोपिवा । प्रतीपाचरणं प्राहुरलंकारविशारदा इति अलंकार
ः । सचपूर्वोक्तैस्त्रिभिरलंकारैः उत्थापित इतिसंकरः । यद्यपि
ः व्याख्यातृभिः चैत्रेमासिसीताहरणं निश्चितमिति नतदा
स्यसंभवः तथापि मीनमेषयोः मेषवृषभयोर्वा वसन्तइति
त्वात्क्वचिद्देशे वसन्तस्यमीनादित्वेपि मेषादित्वस्यापिसत्वात्

तस्य च मेषस्य चान्द्रचैत्रान्तेपि आरंभसंभवात् चैत्रे शिशि
इतिनकश्चिद्दोषः ॥

अथ त्रिभिः वसन्तसमयानुभूतां स्वावस्थां वदति । माध्वी
अहमित्यर्थः अहमितिवक्तव्ये रामइति परोक्षोक्तिः जयत्यादि
त्रातुं नशक्तायुधि रामवध्यं इत्याद्युक्तरीत्या स्वस्याप्रति हतपर
द्विद्योतनाय । माध्व्या मकरन्देन दिग्धैः लिप्तैः विषाक्तैरितिच
अनेन वसन्तस्य अन्याय्य युद्धप्रवृत्तत्वं दुर्जयत्वंच व्यज्यते
रायुधैर्हन्यात् युध्यमानो रणेरिपून् । नकर्णिभिर्नापिदिग्धैः ना
तेजनैरितिस्मृतेः । विरहिणीनां माध्वी विषप्रायेतिभावः । दिग्
बाणेस्यात् पुंसिलिप्तेन्यलिंगकइति मेदिनी । अतएव विरहिण
गिनीनां वनितानां अत्यनुरक्तस्त्रीणां । वनिता जातरागस्त्री ।
त्रिषुयाचिते । सेविते इतिमेदिनी । आस्वादे कबळने तत्प्र
इतियावत् लुब्धैः अभिलाषुकैः लुभगार्ध्ये कर्तरिक्तः कुसुमानि
हिणीनां दुस्सहानीतिभावः । अमोघैः अनिरर्थकैः अनपराद्धैरि
मोघंनिरर्थकमित्यमरः कुसुमानि धनुर्यस्य तस्य मन्मथस्य वासंइ
वैकल्पिकत्वात् नानङ् । चित्रपुंखैः बाणविशेषैः कुसुमैरिति
स्थूलक्ष्वेडो विपाठश्च चित्रपुंखश्शरस्सरइति त्रिकाण्डशेषः
अन्तान् अन्तराणि अन्तोस्त्री निश्चये नाशे स्वरूपेप्रान्तिकेन्तरे
माला । आवृण्वन्तं समन्तात् आछादयन्तं वसन्तस्यमन्मथसहाय
भावः अनेन अन्यत्र अपसर्पणस्यापि नावकाशइति व्यंजितं
तन्नामानमृतुंत्रासात् त्वद्विषयानिष्टाचरणभयात् हेतोः अनमितं
धनुः कोदण्डं येन तथोक्तस्सन् अनारोपितचापस्सन्नित्यर्थः स

श्वैलोलैः परभृत कुलैर्मुक्तकोलाहलानां
ग़ीरेणुस्थगितवपुषां मन्दरं निर्गतानाम्।
तेनाहं भ्रमरपटलीशृङ्खलासङ्कुलानां
र्गे तिष्ठन्मलयमरुतां वारितो लक्ष्मणेन॥ ॥ ३६ ॥

ात् धनुषश्चेतिनानङ् अन्यथा अनमितधन्वेतिस्यात्
ःति उकारान्तः पुंल्लिङ्गः अतएव अवष्टब्धधनुं राममिति
पुमान्प्रियाळ्द्रौ राशिभेदे शरासन इति नाद्रिके मेदिनी।
देवेत्याह सन्नतेन सम्यक् नम्रेण नतुनमितेन स्वतएव
तिभावः मौळिना शिरसा इत्थंभूतः मुण्डोत्तमाङ्गमस्तक
र्षिमूर्धकानिस्युरिति हलायुधः। भवान् पञ्चशरसाहायका
ाज्यः त्वमित्यर्थः भातेर्डवतुप् सीतायाः विरहदीनाया इति
अन्तिकदेशे नभवतु नतिष्ठतु मत्पार्श्वेतु भवतुमावा तत्पार्श्वेतु
अन्यथा साजीवितं परित्यजेदपीतिभावः प्रार्थनायां लोट्
ण अवोचत् अवादीत् ब्रूञ्व्यक्तायां वाचि इत्यस्माल्लुङि
ः रामोपि त्वदनिष्टाचरण भयात् धनुरप्याधिनमय्य नतेन
ा मपि प्रार्थितवान् नतुकोपात् निर्भर्त्सितवान् अहोविषमा
ारितिभावः। अत्रत्रासं प्रति आवृण्वन्त मित्यस्य हेतुत्वात्
ां प्रतित्रासस्यहेतुत्वात्काव्यलिंगद्वयं। प्रार्थनाया असंबन्धेपि
रूपातिशयोक्तिः त्रासादिति काव्यलिंगेनोत्थापितेति
ुसुमानां मन्मथबाणत्वेनोक्त्यापर्यायोक्तं। तच्च आवृण्वन्त
ालिंगंप्रत्यंगामितिसंकर इति संक्षेपः॥ ॥ ३५ ॥
ा॥ पार्श्वे पश्चभागयोरित्यर्थः लोलैः चलैः वृक्षाद्वृक्षं पतद्भिरि

त्यर्थः परभृतानां कोकिलानां कुलैः यूथैरित्यर्थः अनेन
न्तर विनिर्गतत्वं व्यंजितं । सजातीयैः कुलमित्यमरः ।
कोलाहला: कलकलरवाः येषुतथोक्तानां । परभृतर
प्रसृतैः कोकिलरवैः हेतुभिःमुक्तकोलाहलानां प्रकाशितबृ
कोकिलालापरूपबृंहितवतामितियावत्. मल्लीनां विकारा
तासां विकसितानां मितिभावः । रेणुभिः परागैः स्थगित
तानि वपूंषिगात्राणि येषां तथोक्तानां मल्लिकाधूळिधूसरग
भ्रमरपटली मधुव्रतश्रेणी श्रृंखलानिगळमिवतया संकुला
अथ श्रृंखला।अन्दुको निगळोस्त्रीस्यादिति अघसंकुलं।पर
त्कीर्णेव्याकुलेपिचेतिच अमररत्नमाले । अतएव मन्दरंम
मन्दरो मन्दरेशैले स्वर्गमन्दारयोरपि । मन्दरो बहुळेमन्
निर्गतानां निष्क्रान्तानां गिरेरितिभावः । मलयमरुतां
तानां मार्गे आगमनमार्गे तिष्ठन् इतिकर्तव्यतामूढतया
अहं किमपिविचिन्त्यशोचन्नितिभावः । भीतेन त्रस्तेन
मलयमारुत सेवायां कथंभवे दितिसंभ्रान्तेनेत्यर्थः। लक्ष्मणं
अन्यस्य कस्याप्यभावादितिभावः । वारितः माशुचःपुरु
दपसारितः यदिलक्ष्मणोनावारयिष्यत् तदानाहमजीविष्
अत्र वर्णितेषु मलयमारुतेषु उभयपार्श्वगतैर्भीतैः जनैः त्रि
हलहेतुभूतानां स्वतएव कृतगर्जितानांवा धूळिधूसरितांगा
पदानां स्थानादुद्गतानां मन्दं गच्छतां मत्तगजानां वृ
दारोपित इतिसमासोक्तिः भ्रमरपटली श्रृंखलेत्युपमया संव
त्यस्य निवारणं प्रतिहेतुत्वात् काव्यलिंगं तदपि समासोक्ते

ो वक्ष्ये किमिव जनकं किंनु योगीश्वरो मा
ावं मे सुतनु मनसो वर्तयन्तिस्म खेदम् ।
ाशोके ज्वलति सविधे लाजवर्षाभिरामैः
ाधिस्त्वत्परिणयदशां व्यञ्जयन्तः करञ्जाः ॥ ॥ ३७ ॥

इतटस्थोद्दीपन विभावानां मार्गे तिष्ठन्नहमित्यनुभावानां
वन्तादिव्यभिचारिणां मार्गेतिष्ठन्नितिस्तंभरूप सात्त्वकस्य
ालंभश्रृंगारोऽव्यज्यत इति संक्षेपः ॥ ॥ ३६ ॥

हे सुतनु शोभनमूर्ते रक्ताशोके रक्तपुष्पे वञ्जुळवृक्षे ।
ाशोकइति अशोकद्वैविध्यं पुष्पेषुरक्तत्वपीतत्वकृतंबोध्यं।
प्रदेशे ज्वलतिर्दीप्यमाने सतिपुष्पैरितिभावः।ज्वलतीत्युक्तेः
ञ्यंजितं । लाजानां वर्षवृष्टिरिव अभिरामैः रम्यैः पुष्पौघैः
अशोकेनिपतद्भिरितिभावः । तवसीतायाः परिणयदशां
ञ्यञ्जयन्तः प्रकाशयन्तः स्मारयन्त इतियावत् । विवाहे
देतिभावः । करञ्जाः चिरिबिल्वतरवः कर्तारः चिरिबिल्वा
ावकुळास्तथेति तेषामपिवसन्तेपुष्पितत्ववर्णनात् । मन्दः
ीत सीतइातियावत् । अहं मूढाल्पापदुर्निर्भाग्यामन्दाइत्य
तन्नामानं सीतायाः पितरं किमिववक्ष्ये किमितिवदिष्याभि
ालंकारे तेन सीतायाः कुशलं पृष्टः नाशितामया सीतेति
तिभावः । अञोळटिवच्यादेशः । योगीश्वरः योगिश्रेष्ठःजन
तसीतं किन्नुवक्ष्यत इति पुरुषविपरिणा मेनान्वेति।किंनु
इातेनवक्तव्यं तच्छ्रोतुमनर्हमेवस्यादितिभावः । अत्रयोगी
महापूज्यतया अनुपेक्ष्यवचनत्वद्योतनाय । इत्येवं उक्तेन

चेतोनैव त्यजति चपलाहेमकोणभिघाता
द्वीरोदात्तस्तनितजलदात्ताण्डवारम्भमिछन् ।
वातोन्मुक्तैः कुटजकुसुमैर्वासिते शैलशृङ्गे
रक्षः पीडारहितदयिताश्लेषधन्यो मयूरः ॥ ॥ ३८

ोत्यर्थः इत्येवमिति एकार्यकोनिपातसमुदायः । मे मम मन
र खेदं सन्तापं वर्तयन्तिस्म भावयन्तिस्म संपादयन्तिस्मेतियावत्
इतिभूते लट् । अत्र स्वेदवर्तनं प्रति परिणयदशा व्यञ्जनस्ये
व्वलिंगं । लाजवर्षाभिरामैरित्युपमा । तदुत्थापितः व्यञ्जयन्त इ
लंकारः । सदृशानुभवादन्यस्मृति स्स्मरणमुच्यत इति लक्षणात्
काव्यलिंगमुत्थापितमितिसंकरः ॥ ॥ ३७
र द्वाभ्यां वर्षानुभूतामवस्थां वदति ॥ चेतइति ॥ यद्यपि ऋत्वन्
ष्मेपि मलयमरुतांव्रातायाताःविकासितमल्लिकापरिमळभरो भ
वमुत्सहसेयदि । घनघटयतं त्वंनिस्नेहंयएवनिवर्तनेप्रभव तिग
छन्नंसएवधनञ्जयः । इत्यादिवत् विरहिभिर्वक्तव्यमस्त्ये
ग्रीष्ममासयोराद्यस्यवसन्तेनान्त्यस्यवर्षाभिश्च एकीकृत्य श्रीमः
द्वालाप्याचार्यैर्वर्णनंकृतं । अतएव आषाढस्य प्रथमदिवस इ
ासस्य वर्षाचिह्न वर्णनमपिसंगच्छत इत्यलमाधिकेन । वाते
ा उन्मुक्तैः कीर्णैः कुटजकुसुमैः गिरिमल्लिकापुष्पैः वासिते परि
ालस्य माल्यवतोनाम पर्वतस्य श्रृंगे शिखरे मदावास भूत इ
रक्षसः रावणस्य पीडया अपहरणादिबाधया रहितायाः हीनाया
ाः वल्लभायाः मयूर्याः आश्लेषेण परिष्वंगेण धन्यः पुण्यवान्
ण्यवान् धन्य इत्यमरः । निरन्तरकान्ता परिष्वंगहेतु पुण्यशाल

अतएव धीरंस्वैरं क्वचिदप्यकुण्ठितामितियावत् । उदात्तं मह
ा । धीरोधैर्यान्वितेस्वैरे धीरस्यात्सिुपण्डित इतिमेदिनी । स्प
स्वैरेपुंसि वदान्यमहतोस्त्रिष्विति रत्नमाला । स्तनितः गर्जि
येन । स्तनदेवशब्दे । कर्तरिक्तः हेतुमण्णिजन्तात्स्तनयतेः क
ा । स्तनितं गर्जितम्मेघ निर्घोषोरसितादिचेत्यमरः । स्वनितो
नितः ध्वनितः । स्वनशब्दे । शेषंप्राग्वत् । स्वनितं ध्वनितंस
। तटितिहेमकोणत्वरूपणेन अरूपितमपि जलदे ताण्डवोपकार
ःतनिते तध्वनित्वंच प्रतीयते । तस्मात् चपलातटिदेव हेमकोण
दनदण्डः । चपलाकमला विद्युत्पुंश्चलीपिप्पलीषुच. नपुंसकन्
् वाच्यवत्त रळेचल इतिमेदिनी । कोणोवीणादिवादनमित्यमरः
भघातात् घट्टनाद्धेतोः अत्र विषयस्य तटितः चलार्थकेन चपल
नेर्देशात् विषयिणि कोणेपि अतिचाञ्चल्यं व्यज्यते । तेनच
ातुर्यातिशयोव्यज्यते । तण्डुना नन्दिना प्रोक्तं ताण्डवं पुंनृत्यं
गां गविक्षेपं ताण्डवमित्युक्तेः तस्य आरंभं उपक्रमं इच्छन्
ाणः नतुतांडवमारभमाणः कुर्वाणोवा । सत्यपि पुष्कलकारणे
भमेव इच्छति नत्वारभतेपि । आश्लेषविच्छेद भयादितिभावः
ूरः बर्हिणः चेतः मम मनः नैवत्यजति नैवमुञ्चति सत्यपि
(इतिभावः । नित्यंस्मरणगोचरीभवतीतिभावः । अत्र चपला
ेकदेशविवर्तिरूपकं । दयिताश्लेषधन्य इति मयूरस्तुत्यादयिता
ायात्मनोनिन्दाव्यज्यत इतिव्याजस्तुतिः।उक्तिर्व्याजस्तुतिर्निन्दा
तुति निन्दयो रितिलक्षणात् । चेतसस्त्यागाभावंप्रति इच्छ
च्छांप्रति आश्लेषधन्यत्वस्यच हेतुत्वात्काव्यलिंग द्वयमितिसंक्षे

शैलव्यक्तप्रतिविलपितां सान्द्रतापानुविद्धां
तन्वानानां नयनसलिलैर्मातरं ते सबाष्पाम् ।
पश्यन्तीनां प्रबलमदनोन्मादपर्याकुलं मां
प्रायो जातं किमपि रुदितं व्योम्नि कादम्बिनीनाम्

पः । अथवादयिताश्लेषधन्यः अतएव वर्षासमयारंभजनिता
कात् चपलाहेमकोणाभिघातात् हेतोः दयितयासह का
महतस्ताण्डवस्य आरंभं इच्छन् मयूर इतिवाक्यार्थः ॥

शैलेति । व्योम्निगगने विद्यमानानामितिशेषः । अतएव क
मेघमालानां प्रबलः बलीयान् दुर्निवार इतिभावः । यः मदनेन
तदावेशेनेतियावत् । उन्मादः चित्तविभ्रमः तेन पर्याकुलं व्य
त्वद्विरहित मितिभावः।पश्यन्तीनां विलोकमानानां विद्युन्नयनै
अतएव सान्द्रेण निरन्तरेण तापेन संज्वरेण पुत्रीवियोगादि
भावः। अन्यत्र निदाघजनितेनसन्तापेन अनुविद्धां आहतां ते
मातरंजननीं भूमिं शैलेषु गिरिषुव्यक्तं उद्धतं प्रतिविलपितं प्रा
यस्याः तादृशीं स्वविलापतयाध्यवसित गर्जितमूलक प्रतिविल
सित प्रतिध्वाना मित्यर्थः । नयनसलिलैः ने त्रजलैः तत्वेनाध्य
वारिबिन्दुभि रितिभावः । सबाष्पां साश्रुजलां अन्यत्रसोष्माणः
नेत्रजलोष्मणोरितिरत्नमाला । प्राथमिकवर्षोदबिन्दुनिपाते भू
द्गच्छति सबाष्प इत्युच्यते । तन्वानानां कुर्वाणानाश्वसतीनां
अनिर्वचनीयं रुदितं रोदनं अश्रुमोचनादिव्यापारः भावेक्तः ।
प्रादुर्भूतमिवेत्युत्प्रेक्षा। अत्रप्रस्तुते कादंबिनीवृत्तान्ते वर्ण्यमाने
विरहितां प्रियांप्रतिबलवत्पर्याकुलस्य कस्यचित् दर्शनेन

देहस्पर्शं मलयपवने दृष्टिसंभेदमिन्दौ
नामैकत्वं जगति भुवि चाभिन्नपर्यङ्कयोगम् ।
ताराचित्रे वियति विततिं श्रीवितानस्य पश्य
दूरीभूतां सुतनु विधिना त्वामहं निर्विशामि ॥ ॥ ४० ॥

नां तदनुबन्धिनीं स्वरोदनेन रोदयन्तीनां कासांचित् कुडुंबि
तः प्रतीयत इति समासोक्तिः । तापादिशब्दश्लेषमूलकाभेदा
तिशयोक्त्या नयनसलिलै रित्यादिरूपकातिशयोक्त्या च
कादंबिनीवर्णने तद्रोदनस्वरूपोत्प्रेक्षा उक्तसमासोक्तिगर्भैवो
त्प्रेक्षासमासोक्त्योस्समप्राधान्य संकरश्चेति संक्षेपः॥ ॥३६॥
कथं जीवितं भवताधार्यत इत्यत्राह । देहेति ॥ हेसुतनु
णसमृद्धिर्व्यंजिता । अहंदूरस्थितोपीतिभावः मलयपवने
त्वयास्पृष्टे त्वांस्पृष्टवतिचेतिभावः । सीतासन्निकर्षद्योतनाय
हस्पर्शं गात्रावमर्शं पश्यन् जानान्नित्यर्थः । निर्वेशौपयिकं
वमर्शं मलयपवनान्तर्भावेण पश्यन्नित्यर्थः । एवमन्यदपिनिर्वे
तिबोद्ध्यं । पश्यन्नितिविततिमित्यन्तेषु द्वितीयान्तेष्वन्वेति ।
ष्टस्पर्शनरूपो विरहिणां विनोदोप्युक्तः । यतः तत्सादृश्य
त्स्वप्नदर्शनानि तदंगस्पृष्टस्पर्शनंचेति चत्वारोविरहिणां वि
न्ते । इन्दौ पूर्णचन्द्रे इत्यर्थः । तस्यैव मुखतुल्यत्वात् दृष्टयोः
श्वसंभेदं संगपश्यन् । संभेदस्स्फुटने संगइति मेदिनी ।
न्द्रं त्वन्मुखसदृशइति पश्यामि तथा त्वमपीति चन्द्रान्तर्भा
दृष्टिसंभेदं पश्यन्नित्यर्थः । अनेन सादृश्य दर्शनरूपो विनो
तावता, वाहिवातयतः कान्तातांस्पृष्ट्वा मामपिस्पृश । त्वयि

भेगात्र संस्पर्शः चन्द्रेदृष्टि समागम इत्येतत्स्मारितं । अथवा
देहस्पर्शं पश्यन् त्वत्स्पृष्टमलयपवन स्पर्शंत्वत्स्पर्शंपश्यान्नित्यर्थः
संभेदं पश्यन् त्वन्मुखतुल्यचन्द्रदर्शनं त्वन्मुखदर्शनं पश्यान्नित्यर्थ
समानं । जगतिभुवने धाम्नः गृहस्य शय्यागृहस्येत्यर्थः। एकत्वं
पश्यन् एकस्मिन्नेव जगति उभयोरवस्थाना दितिभावः। भुवि
नस्य एकस्य पर्यंकस्य मञ्चस्य मञ्चपर्यंक पल्यंकाः खट्वयासमा
योगंसंबन्धं पश्यन् एकभूम्यवस्थानमेव एकमञ्चावस्थानं पश्य
भुविचेति चकारः भिन्नक्रमः विततिमित्यनेनान्वेति । भुविचार
भूविभूप्रदेशयोरित्यर्थः। आसन्नयोः निकटवर्तिनोः पर्यंकयोः यो
मेत्यर्थः । लंकाभुवः स्वस्थानभूसन्निकृष्टत्वादितिभावः । त
रंपृथक् शयनमेवहिदंपत्योर्विहितं ! यदाह आपस्तंबः याव
श्वसहशय्या ततोनानेति । अस्यार्थः यावत्सन्निपातं यावदुप
त्योस्सहशयनं ततोनाना पृथक् दंपतीशयीयातामिति। ताराभि
वते नानावर्णे वियतिगगने । उर्ध्वप्रदेशे वितन्यतइति विता
सनं श्रिया शोभयायुक्तं वितानं श्रीवितानमितिमध्यमपद लोप
स्त्रीवितान मुल्लोचइत्यमरः । तस्यविततिं विस्तृतिंच पश्यन्स
त्वोरितिहेतौशता । विधिनादैवेन हेतुना दूरीभूतां विप्रकृष्टां
व्यवहितामितियावत् च्वि:।त्वां निर्विशामि उपभुंजे निर्वेश उपः
त्यमरः । दवीयसीमपि त्वां तत्रतत्र उपभोगसामग्रीं कल्पयन्
र्तिनीमिव अनुभवामि अयमेव जीवित धारणोपाय इतिभाव
तानिर्वेशरूपकार्यस्य तद्धेतुभिः मलयपवनादौ देहस्पर्शादिज्ञा
र्शनात् हतुरलंकारः हेतोर्हेतुमतासार्धं वर्णनं हेतुरुच्यते । अ

प्राप्तैस्सख्यं तव नयनयोः पद्मकोशैः प्रबुद्धै
स्सन्नाहं नस्समयनियतं साधु सन्धुक्षयन्ती ।
सेनायोग्यां सरणिमधुना दर्शयन्ती शुभाशा
सीते नूनं त्वरयति शरत्त्वत्समीपं निनीषुः ॥ ॥ ४१ ॥

निच्छेदायसुभ्रुत्वामिति लक्ष्यलक्षणसंग्रहात् । सच जगदादौ
ाद्यारोपरूपै रूपकैः उत्थाप्यत इतिसंकरः ॥ ॥ ४० ॥
दः कृत्यमाह। प्राप्तैरिति। हे सीते शरत् तव नयनयोः नेत्रयोः
सादृश्यमितिभावः प्राप्तैः प्राप्तवद्भिः कर्तरिक्तः । प्रबुद्धैः
लदावरणापायेन रविकरानिरोधा दितिभावः । पद्मकोशैः
ळैः नेत्रस्थानीयैरितिभावः । नः ममेत्यर्थः अस्मदोद्वयोश्चेति
समये अवसरे शरत्कालइत्यर्थः । नियतं नियमितं तत्रैवकर्त
हितमितियावत् शरदेव युद्धकालत्वादितिभावः । सन्नाहं
द्योगमित्यर्थः साधुसम्यग्यथातथा सन्धुक्षयन्ती उद्दीपयन्ती
त्वन्नयनसदृशैः पद्मैः त्वन्नयनकृत्यमेव सन्नाहसन्धुक्षणं करोति
सरसतापादनेन नयनाकूतैरेव दयितसन्नाहं सन्धुक्षयन्तीति
ल मेताबदेवेत्याह। शुभाः शोभमानाः आशाः दिशः यस्यां
ापायादितिभावः शुभेकल्याणेदंपति संयोजनरूपे आशा
इत्यपिगम्यते अतएव सरणिं पदवीं सेनायाः पृतनायाः
ग्यां अधुना संप्रति दर्शयन्ती प्रकाशयन्ती सती वर्षासुकर्दम
ानि अकर्दमान् कुर्वतीसतीतियावत् अत्रन इति विभक्तिवि
ते मामित्यर्थः त्वत्समीपं त्वदन्तिकं निनीषुः प्रापयितुमिच्छुः
निश्चितं नातस्त्वयाभेतव्य मितिभावः । अत्र पद्मानां नयन

दण्डकारण्यं उद्यानमिवचागतेति श्रीमद्रामायणानुरोधेन। तद
नुगता उद्यानमिवचागतेत्याभ्यां उक्तार्थएवस्वरसतः प्रतीयं
पतिपाराध्यादिकं व्यंजितं मदीयेमत्संबन्धिनि बाहुमध्येवच
अभ्यस्तं शयनं यया उचितं युक्तंशयनं यस्यावा तां। उचि
तेयोग्येज्ञातेऽभ्यस्ते समञ्जसे इति रत्नमाला। अनेन सौकुमा
व्यञ्जितं। ता त्वामेव एवकारेण दूरेकरणं सर्वथानुचित मितिस्व
ं व्यज्यतेत्वांहेगुणवति पतिपाराध्यं सौकुमार्यादिगुण संपन्ने
तुप्। दूरेविप्रकृष्टेदेशेकृत्वा निवास्येत्यर्थः। तिष्ठत इत्यध्याहा
ादूरीकरण परितापयोः असमानकर्तृकत्वेनक्त्वा प्रत्ययानुपपत्तेः
रितिपाठेतु कर्तुः कृतवत इत्यर्थः मुहुः पुनःपुनः दूयते परितप
रेतापे लट्। अहंदूय इतिवक्तव्ये जीवितं दूयत इत्युक्तिः तस
तिभूतयात्वया विरहितं जीवितं स्वयमेव तप्यतइति ता
द्योतनाय, अत्र जीवितपरितापं प्रतिगुण वत्सीता दूरीकरण
काव्यलिंगं। यामामेकावनमनुगता, तामेवत्वां दूरेकृत्वा, मुहुर्दूय
म इत्येतैः निर्वेदविषादादयो व्यज्यमाना अन्योन्यानुपमर्देन सं
 भावसन्धिः। अत्रनिर्वेदः वियोगविस्रब्धप्रियारक्षण सामर्थ्
तं स्वावमाननं। विषादस्तु इष्टानवाप्ति स्वापराधपरिज्ञाना
नुतापः। अन्यदप्यूह्यं यद्यपितामेवत्वामित्यत्र अन्वादेशेतु नि
वान्नावादीनां अन्वादेशविषयेनित्यत्वमुक्त्वा तस्मैतेनम इत्यु
 तामेवत्वेत्येवोचितमिव। यतः आदेशः कथनं अन्वादेशो
ति उच्यते तथापि युष्मदस्मदो विभाषाऽनन्वादेश इति वक्तव
ैकस्य सपूर्वायाः प्रथमाया विभाषेत्यत्रपठितत्वेन अनन्वादेशे

सेतुं बद्ध्वा विपुलमचलैस्सायकैर्वापयोधौ
कृत्वा लङ्कां स्रजमिवकरे खेलतां वानराणां ।
अल्पीयोभिस्सुमुखि दिवसैर्याधयन्यातुधाना
न्कर्णे शीघ्रं तव रचयिता लक्ष्मणश्चापघोषैः ॥

त्यमित्यस्यापि तद्विषयत्वाभि प्रायेण अत्र त्वामित्युक्तिरिति न
तस्तु अविशेषेण सर्वेषां वान्नावादीनां विकल्पोयं विधीयत इ
नात्रकश्चिद्दोषः अत्र अन्वादेश प्रसक्तेरेवाभावात्. अन्वादेशे
च्चित् कार्यं विधातुं पुनरुपादान मित्युच्यते प्रकृते पूर्वार्धस्य
गेन तस्यार्थस्य सीताविदितत्वेनच अनुवादत्वेन तत्रैव अ
अन्वादेशस्य प्रसक्त्यभावात् । अतएव ईषदर्थे क्रियायोगेमर्या
चयः। एतमातंङितं विद्यात् वाक्यस्मरणयोरङि दित्यत्र एतमि
नमिति । एवमेव नक्तं भीरुरयं त्वमेव तदिमं राधेगृहं प्रापये
मित्येवोक्तं नत्वेनमिति । नक्तं भीरुरयमित्यस्य राधाविदितत्व
अनुवाद्यत्वसिद्धेः एतेनतां त्वांदासइतिप्रपन्न इतिचस्तोष्याम्य
इत्यादिषुत्वा मित्यस्य असाधुतां शंकमाना उपेक्षणीयाः।यस्य
पूर्वार्धस्य यच्छब्दयोगेन श्रीविदितार्थकत्वेनच अनुवाद्यत्वे अ
एव अभावेन अन्वादेश प्रसक्तेर्दूरोत्सारितत्वादित्यलं पल्लवितेन

अथ कथन्नुखलुदुष्पारं तरिष्यन्ति महोदधिं । तानिहर्यृक्ष
वानरवरात्मजौ इत्येव रूपां सीतायाश्शंकां निवारयति ।
शोभनं मुखंयस्याः तस्यास्संबुद्धिः हे सुमुखि लक्ष्मणः तवप्र
भावः । पयोधौ समुद्रे अचलैः शैलैः सायकैः वाणैर्वा अक्षर
दितिभावः।वाकारोविकल्पे।विपुलं विशालं सैन्ययात्रायाः पय

।ध्वा निर्माय इदंच स्वस्यैव प्रथमे प्रायोजकत्वं द्वितीये साम
गस्याप्यस्तीत्यभिप्रायेण । लंकां तन्नाम्नीं नगरीं खेलतां सेतु
ःरतां एतेन लंकाविध्वंसनं तेषां ईषत्करमिति व्यज्यते । वान
ां करेपाणौ स्रजं कुसुममालामिव कृत्वानिधाय कपिकरमा
नतेत्यादि लौकिक निदर्शन प्रसिद्ध्या वानरैर्लङ्कां कदर्थ
अतिशयेन अल्पे अल्पीयांसः द्विवचनविभज्येत्यादिना ईय
ोपपदा प्रयोगेपि बौद्धप्रतियोग्यपेक्षया आतिशायिनिका
त्रैमेवद्रक्ष्यस्यग्रे लघुतरगतिरित्यत्र प्रतिपादितं। युवाल्पयोरिति
वैकल्पिकत्वात् नात्राल्पशब्दस्य कनादेशः । तैः दिवसैः
रेवेतिभावः । यातुधानान् राक्षसान् योधयन् युद्ध्यमानान्
।चापघोषादिनेतिभावः। युधसंप्रहारे । अस्माण्णिजन्ताच्छता
कत्वेन गतिबुद्धीत्यादिना अणौ कर्तॄणां यातुधानानांणौ
पघोषैः धनुर्विष्फारैः तत्रसीतायाः कर्णेश्रोत्रे कर्णयोरित्यर्थः।
इक्षुरसजातं मद्यविशेषमित्यर्थः । मैरेयमासवश्शीधुरित्यमरः।
र्ता अनद्यतन भविष्यतिलुट् । अनेन अल्पमेवकालं सोढव्य
। अत्र लक्ष्मणपराक्रममात्र प्रशंसनं नियुक्तोधुरियस्यान्लु
र्यवान् । यंदृष्ट्वाराघवोनैव वृत्तमार्य मनुस्मरेत्, इति सीतावच
ाः लक्ष्मणे प्रत्ययाधिक्यव्यं जनाय नात्रकर्मणिममापेक्षा
र्यास्तइति व्यंजनायचेति बोद्ध्यं । अत्र समबलयोः सेतुबन्ध
ाप्तयोः अचलसायकयोः विरोधस्फुरणात् विकल्पालंकारः।
शिष्टयात् युगपत् प्राप्तयोः क्वचित् । विरोधश्चेत् सदृशयोर्विक
त इति साहित्यरत्नाकरोक्तेः । लंकांस्रजमिवेत्युपमा । विषय

रक्षोमौळिस्तबकलवनाद्वैरबन्धे विमुक्ते
गत्वा चोर्वीं गगनपदवीस्वैरिणा पुष्पकेण ।
सिद्धारम्भौ सपदि भवतामाधिराज्याभिषेकात्
संप्राप्स्यावश्चिरविरहतस्संचितान्देवि भोगान् ॥

भूतमानन्दं निगीर्य विषयिवाचकशीध्रुपदेनोपादानात् र
क्तिश्च । अचलैस्सेतुबन्धने तस्य बहुकाल सामग्रीसाध्यतय
दितिशंकया कल्पान्तरानुधावनस्वास्यादरणे तुल्यबलां
नविकल्पालंकार इति संक्षेपः ॥

अथ रक्षोगृहस्थिति दूषितेयमिति यदिमां राजपुत्रः शं
किष्ठा इत्याह। रक्ष इति। रक्षसः रावणस्य अत्र कचित्कचित् रक्ष
निर्देशः तस्य अत्यल्पत्वद्योतनाय । मौलय एवस्तबकः
गुच्छकस्तुस्तबक इत्यमरः । तस्य लवनात् छेदनात् हेतोः
लवनशब्दाभ्यां नखाग्रेणापि निकर्तितुं शक्यमिति ब्यः
विरोधस्य बन्धे बन्धने रावणविषय इतिभावः। विमुक्ते वि
पगतेसतीत्यर्थः । कर्तरिक्तः । गगनपदव्यां अन्तरिक्षम
स्वच्छन्दसंचार शीलेनेत्यर्थः । कामगेनेतियावत् पुष्पकेण
विमानेन रावणेनबलादपहृत्य रक्षितेनेतिभावः । उर्वीभूमिं
पुष्पकेण गगनपदवीं अतीत्य भूमिंगत्वेत्यर्थः । चकारः पा
समुच्चयेवा । सपदि तत्क्षणएव पुष्पकावतरणोत्तरकालएवेत्
तिभवन्तः तेषां पूज्यानां वसिष्ठादीनां कर्तरिषष्ठी अधिकश्च
अधिराजः राजाहस्सखिभ्य इतिटच्। तस्यभावः कर्मवा अ
वचनेत्यादिनाष्यञ् । तस्मिन्. अभिषेकात् अभिषेचनात्

चेत्ते कुर्यात्तदपि भवती यज्जनस्थानयुद्धात्
प्राप्तं मां दशमुखसमान्पारयित्वा खरादीन् ।
स्त्वाघातं स्तनकलशयोरूष्मणा रोपियद्भि
ढाश्लेषैरपिहितवती गद्गदाहर्षबाष्पैः ॥ ॥ ४५ ॥

ल्यब्लोपे पञ्चमी । सिद्धः निष्पन्नः आरंभः उद्यमः निरन्त षविषयः ययोः तयोक्तौसन्तौ आरंभस्तुत्वरायां स्यादुद्यमेव मेदिनी । दीव्यतीतिदेवीतस्याः संबुद्धिः हेदेवि । चिरं विरहः स्मात् चिरविरहतः संचितान् संपादितान् चिरविरहाभावे गासंभवादितिभावः । भोगान् संभोगान् बहुवचनेन अचि व्यंजयता भोगस्य संपन्नतरत्वं व्यञ्जितं । यथोक्तं भयव्यळी ावात् प्राप्तवैभवः प्रोषितागतयोर्यूनोः भोगस्संपन्न ईरितइति सम्यक् विगळितवेद्यान्तरं यथातथा लप्स्यावहे । अत्रमौळि कं । बन्धमोक्षलवनयोः कार्यकारणयोः भिन्नदेशत्ववर्णनात् विरुद्धंभिन्नदेशत्वं कार्यहेत्वोरसंगति रिति लक्षणात्। देवीति ोगप्राप्तयर्हत्वाभिप्रायकत्वात् परिकरांकुरः । वर्णनीयेरामभद्र ते कर्मबन्धे विमुक्ते व्योमयानेन देशविशेषं प्राप्यमुक्तैश्वर्यं ासह भोगान् अनुबुभूषतो मुमुक्षोर्वृत्तान्तोऽप्रस्तुतः प्रतीयत क्तिश्च ॥ ॥ ४४ ॥

मौळिस्तबकलवन प्रत्यायनाय प्राक्तनवृत्तान्तं स्मारयति । दशमुखेन समान् रावण तुल्यान् अनेन रावणस्य प्रबलत्व खरः आदिः प्रथमः येषां दूषणादीनां तान् पारयित्वा समाप्य । पारतीर कर्मसमाप्तौ । जनस्थाने तन्नामके खरादस्थाने

शय्याः क्लेशं क्वचनसमये तादृशं चिन्तयित्वा
स्मृत्वा देवीमचलतनयां विप्रयुक्तां शिवेन !
रक्षात्मानं कथमपि शुभे जीवितालम्बनं मे
पत्युश्शैंदाद्व्यसनमपि हि श्लाघनीयं वधूनाम् ॥ ॥

र्वृत्तात् युद्धात् आयोधनात् संप्राप्तं समागतं मां खरबाण वि
क्तांगमितिभावः । हर्षबाष्पैः आनन्दाश्रुभिः गद्गदाविकृतस्व
त्वं स्तनकलशयोः कुंभतुल्ययोः कुचयोः ऊष्मणा उष्णेन श
स्त्राणामित्यर्थः आघातं क्षतं रोपयद्भिः रोहयद्भिः रुहबीज
दुर्भविच अस्माणिचिरुहःपोन्यतरस्यामिति वैकल्पिकोहस्वपः
थितौषधिजलपूर्ण कुंभोष्मणाभिषजः क्षतान्युपक्रमन्ते तथेति
ढाश्लेषैः दृढपरिंरंभैः अपिहितवती आच्छादितवती निरवशेषं
आलिंगितवतीतिभावः इतियत् तदपि गाढाश्लेषकरणकमा
पेचित्ते मनसिकुर्यात् चिन्तयेदित्यर्थः । शेषेप्रथम इतिप्रथमपु
पिना पूर्वश्लोकार्थस्समुच्चीयते । अनेन यथा खरादिवधानन्तरं ग
गेः मां प्रमुषितास्त्रक्षतवेदनमकार्षीः तथेदानी मपिकरिष्य
येमीति व्यज्यते । अतः भोगान् संप्राप्स्याव इत्यत्र नमात्वयापि
मितिभावः । अत्र स्तनकलशयो रितिउपमा । ऊष्मणाशस्त्र
ा संबन्धेपि तत्संबन्धोक्ति रतिशयोक्तिः । गाढाश्लेषैरित्यादिना
स्य संभोगशृंगारस्य पूर्वार्धाभिव्यञ्जितो वीररसोङ्गमिति
कारश्च ॥ ॥

अथ अस्त्येवप्रत्ययः अथापि विरहस्य दुस्सहत्वात् विळंबाच्च
वितं त्यक्ष्यामीत्यत्र मदर्थमपिवात्वया आत्मारक्षितव्य इत्याह ।

न्चनकास्मिंश्चित् समये अवसरे यदादैवं प्रातिकूलमितिभावः।
तया ब्रह्महत्यया अभिभूते भूयांसिवपाशियप्सुविलीने महेन्द्रे नहु
वदमध्यासीने इतिभावः। तादृशं वाङ्मनसागोचरं शच्याः
: क्लेशंदुःखं प्रियविश्लेष नहुषप्रधर्षणा जनितदौर्मनस्यलक्षणं
ापि रागादौ व्यवसायेपिच कचिदितिविश्वः। चिन्तयित्वास्मृत्वा
र्षयाभिभूतश्च सपूर्वं ब्रह्महत्ययेत्यारम्भ एवंदुःखमनुप्राप्तं इन्द्रेण
ा। अज्ञातवासश्चकृतः शत्रूणांवधकांक्षयेत्यन्तोद्योगपर्वगता
थानुसंधेया। नकेवलं शच्याएव ततोप्यतिशयित प्रभावायाः
अपीत्याह। स्मृत्वेति। अत्रापिकचनसमय इतिवर्तते पितुः
ध्वरदर्शनावसर इत्यर्थः। देवींपूज्यां अचलस्य हिमवत इत्यर्थः
र्यीं पार्वतीमित्यर्थः. शिवेनशंभुना मंगळभूयिष्ठेनेत्यपिव्यज्यते।
स्य विरहो दुस्सह इतिव्यंजितं विप्रयुक्तां विरहितां स्मृत्वा
अत्र अध्वरे पित्रा दक्षेण अदत्तेरुद्रभागे तदवज्ञामसहमाना
ार्वती तदुत्पन्नं स्वकळेबरं त्यक्त्वा पुनर्हिमवतः कळत्रे मेनायां
महता तपसा महेश्वरं लेभइतिभागवतीकथानुसन्धेया। अनेन
दृष्टान्तेन तवायंक्लेशः ततोल्पीयानेव अतः नातीवत्वयोद्विजि
व्यज्यते। यद्वा वल्लभविश्लेषक्लेशसहनेन आत्मधारणे तस्मिन्नेव
ल्लभ संश्लेषादिसुखं तदसहनेन आत्मत्यागे तस्मिनेन जन्मनि
ेषदुःखमित्यत्र दृष्टान्तद्वयं वेदितव्यं। मत्प्राणधारणा यापि
ां कुर्वित्याह, हेशुभे कल्याणि अनेन इदृशेऽपि संकटे मम
वदायत्तमेवेतिव्यज्यते मे मम जीवितस्य प्राणस्य आलंबनं
त्मानं तव शरीरं। आत्मायत्नो धृतिर्बुद्धिस्स्वभावो ब्रह्मवर्ष्मचे

अप्येतत्ते मनसिनिहितं साह्यमव्याजबन्धो
प्रत्याख्यातुं प्रभवतिनखल्वानृशंस्यं त्वदीयं ।
प्रागप्येवं परिणतगुणां नैषधे वीक्ष्य वार्ताम्
आर्तत्राणं व्रतमिति विदुर्हंस शुद्धात्मनां वः ॥

यमरः । कथमपि महतायत्नेन कथमादितयाप्यन्तं यत्नगौरवबा
ःत्पलमाला । रक्षत्रायस्व धारयेत्यर्थः जीवन् भद्राणिपश्यतीि
ानु व्यसनस्यच मृत्योश्चव्यसनं कष्टमुच्यते । इतिन्यायेन ि
यसनं कथं सहेयेत्यत्राह । पत्युरिति।हियस्मा त्कारणात्।हीतिप्र
श्लाघनीय मित्यनेनान्वेति । वधूनां साध्वीना मित्यर्थः पत्युः भर्तृ
रभिप्रायात् कथंचिदनया जीवित व्यमित्येवं रूपात् हेतोः । ‍
शोच्छन्दा वित्यमरः । छन्दमनुरुद्ध्येतिवा अर्थः ल्यब्लोपे
यसनं विपत्तिरपि । व्यसनन्त्वशुभेभ्रंशेविपत्तौ निष्फलोद्यमे
त्नमाला । श्लाघनीयं श्लाघितुमर्हं सर्वैरपीतिभावः भवतीतिशेषः
मात्मानं रक्षेतियोजना । अस्य द्वात्रिंशश्लोकस्थेन सत्वामेवं वद
त्रयः । अत्र शुभइति विशेष्यस्यत्वदायत्तं मज्जीवित मित्याभिप्रा
रिकरांकुरः। जीवितालंबन मित्यस्य सीतात्मरक्षणी यत्वाभिप्रा
ारिकरः। पत्युरित्यादिना सामान्येन विशेषसमर्थना दर्यान्तरन्य

अथाप्रतिषेधेन साह्याचरणं अभ्युपगतं मत्वा प्रश्नव्याजेन तं
ंसंप्रशंसति । अपीति । अव्याजबन्धो निष्कारणसुहृत् निष्का
ातिवा । बन्धुस्स्यात्पुंसि बन्धूकें मित्रे भ्रातरिबान्धवे इति
ापस्सोपाधिकमेव लौकिकानां बन्धुत्वं तत्रतुनतथेतिभावः ।
ाह्याचरणस्थिरीकरणाय । हे हंस मराळ इदंच शुद्धात्मता प्रति

चेत्ते एतत् मया प्रार्थितं सहभावःकर्मवासाह्यं साहायकं
रूपं सहशब्दो वृत्तौ सहायवाँची ब्राह्मणादेराकृतिगणत्वात्
नेहितं अपिनिश्चितं कश्चित्कर्तव्यमित्यध्यवसित मित्यर्थः ।
गर्हासमुच्चयप्रश्नशंकासं भावनास्वपीत्यमरः । स्वप्रश्नं प्रति
ख्यातुमिति । त्वदीयं अ०याजबन्धोस्तवसंबन्धि नृशंसः
रुद्रः अनृशंसः तस्यभावः आनृशंस्यं स्वार्थनिरपेक्षा परदुःख
कर्तृ साह्यमिति विभक्तिविपरिणामेन द्वितीयान्तं वर्तते
त्वया अंगीकृतं साह्यं निराकर्तुमित्यर्थः । न प्रभवति खलु
येव । खल्विति नियमे । किन्तुसाह्यमंगीकर्तुमेव प्रभवतीति
र हंसस्य आनृशंस्यपराधीनतया उत्तममित्रत्वं सूचितं ।
ं प्रत्याख्यातुंन प्रभवेदित्यत्र परीक्षकाणां निश्चयं प्रमाणयाति।
ागपि पूर्वमपि निषधानां राजानैषधः नळः जनपदशब्दात्
। तस्मिन् विषये । एवं अनेन प्रकारेण साह्याचरणरूपे
रेणतः परिपक्वः गुणः तव आनृशंस्यरूपः यस्याः तयोक्तां
न्तं । वार्ताप्रवृत्तिर्वृत्तान्त इत्यमरः । वीक्ष्य सम्यगालोच्येत्यर्थः।
ना त्वयैव पूर्वनळेपि दमयन्ती संयोजने साह्यमाचरित मिति
भावः । शुद्धात्मनां निर्मलमनसां श्वेतदेहानांच्चवः युष्माकं
न्वयः । आर्तानां दीनानां मादृशाना मितिभावः । त्राणं
कर्तव्यो नियमइति।नियमोव्रतमस्त्री तच्चोपवासादि पुण्यक
दुः विदन्ति जानन्ति निश्चिन्वन्तीत्यर्थः । भूयोदर्शनसत्वा
वेदज्ञानेलट् विदोलटोवेति वैकल्पिकोझेर्जुस् । येशुद्धात्मानः
वृताः इति निश्चितत्वेन तवानृशंस्यं साह्यं प्रत्याख्यातु नप्रभ

इत्थं हृद्यैर्जनकतनयां जीवयित्वा वचोभि
स्सख्यं पुष्यन्दिनकरकुले दीप्यमानैर्नरेन्द्रैः ।
स्वैरं लोकान्विचर निखिलान् सौम्य लक्ष्म्येव विष्णु
सर्वाकारैस्त्वदनुगुणया सेवितो राजहंस्या ॥

त्स्यैवेतिभावः । हन्तशुद्धात्मना मितिपाठेतिरश्चामपि भवतां
भूतं आश्चर्यमितिभावः । अत्र अव्याजबन्ध विति विशेष्यस्य
गानैयत्याभिप्रायकत्वात् परिकरांकुरः । अप्येतत्त इति कृतस्य
अव्याजबन्धुत्वपर्यालोचनया प्रत्याख्यातु मित्यादिना प्रतिषेधात
लंकारः। आक्षेपस्स्वयमुक्तस्य प्रतिषेधोविचारणादितिलक्षणात्
गमित्यदिना सामान्येन विशेषसमर्थनात् अर्थान्तरन्यासश्च ॥

अथ अव्याजबन्धोस्तव उपस्थितमिदं मद्वार्ताप्रापणेनसी
ख्यं मत्साह्याचरणं एकमेव निर्वर्त्य अनुरूप मित्रलाभेनहृष्टः
संचरेत्याह । इत्थमिति। इत्थं भवतीभागधेयेनेत्याद्युक्तप्रकारेण
प्रियाणिहृद्यानि तथोक्तैः हृदयस्य प्रियइति यतिहृदयस्य हृल्ले
हृदादेशः । वचोभिः त्वदीयै मदीयैश्चवचनैः जनकतनयां जा
यित्वा जीवितां कृत्वा । दिनं करोतीति दिनकरः तस्य सूर्यस्य
दीप्यमानैः प्रकाशमानैः अनेन वंशानुरूपत्वं सख्यार्हत्वंचव्यं
वचनेन अस्मद्वंशेतेजश्शौर्यादिहीनो नकश्चिदस्ति आसीत्
त्रेतिव्यंजितं । नरेन्द्रैः पार्थिवैः इन्द्रशब्देन परमैश्वर्यवाचिना सं
भौमत्वं व्यंजितं । सख्युर्भावस्सख्यं मैत्रीं सख्युर्यइति भावार्थेय
वर्धयन् पुषपोषणे । अस्माद्देवादिकाच्छता हेसौम्य प्रसन्न स
र्शादिभिरितिभावः । लक्ष्म्या श्रीदेव्या विष्णुः नारायण इव

मेघाक्रान्ता = मामना...

दिश्यैवं सह कपिकुलैस्सेतुना लङ्घिताब्धिः
ङ्क्ग्रीवे युधि विनिहते प्राप्य सीतां प्रतीतः ।
ाज्यं भूयस्स्वयमनुभवन्नूर्च्चितं पादुकाभ्यां
मः श्रीमानतनुत निजां राजधानीं सनाथाम् ॥ ॥ ४६ ॥

शीलरूपादि भिरितिभावः । तव हंसस्य अनुगुणया अनु
स्या त्वद्दयितयेतिभावः । जातिलक्षणोङीष् । सेवितः कृत
ोपचारस्सन्नित्यर्थः स्वैरं स्वच्छन्दं यथातथा निखिलान् सर्वा
वनानि विचरसंचर यथा भगवान् सर्वात्मनानुरूपया श्रीदे
लोकेषु संचरति तथात्वमपि संचरेतिभावः । अकर्मकधातु
ालोभावोगन्तव्योध्वाचकर्मसंज्ञकइतिवाच्यमिति लोकानां
मन्त्रणेलोट् । आमन्त्रणं कामचारानुज्ञा । अत्र हृद्यैरित्यस्य
तुत्वात्काव्यलिंगं । लक्ष्म्येव विष्णुरित्युपमा ॥ ॥ ४८ ॥
देशानन्तरभावीतिवृत्तं संगृह्णानः आचार्यः काव्यमुपसंह
रयेति ॥ एवं उक्तेन प्रकारेण सन्दिश्य जानकीं प्रतिहंसं
प्रतिप्रापणीयां स्ववार्तां हंसाय कथयित्वेत्यर्थः । अथ
ीरी सन्दिदेशमिथस्सखीं । दातामे भूभृतांनाथः प्रमाणी
ते कालिदास प्रयोगादीदृशार्थलाभः । यद्यपि प्रापणीय
ेव सन्देशइति मार्गकथन वार्ताप्रापणप्रकारकथनादिर्न
ापीदृश सन्देशौपयिकत्वात्तस्यापि सन्देशत्वमिति सर्वमिदं
देश इति नदोषः । कपिकुलैः वानरसंघै स्सहसेतुना नळ

नेबद्धेनेतिभावः । करणे तृतीया । लंघितः तीर्णः अब्धिः
ायोक्तस्सन् । युधि युद्धे समित्याजिसमिद्युध इत्यमरः । पङ्क्तिः
न्धराः यस्य तस्मिन् रावणे पङ्क्तिविंशतीति निपातनात्साधु
ात्तरच्छन्दो दशसंख्याळिभुस्त्रियां इतिमेदिनी । अथग्रीवायां
न्धरेत्यपीत्यमरः । विनिहते विशेषेण निहते परिवारेण सह
ीतां जानकीं प्राप्यलब्ध्वा प्रतीतः हृष्टस्सन् । ख्याते हृष्टे
रः । पादुकाभ्यां पूर्वं भरतायदत्ताभ्या मितिभावः । रक्षितं
वागमनमाकांक्षन् वसन्वै नगराद्बहिः । तव पादुकयोर्न्यस्त
ारंतपेतिभरतोक्त्या पादुकारक्षितत्वं बोद्धव्यं । अतएव भूयः द
द्धिवित्यर्थः । भवतस्तेजसा सर्वं कृतन्दशगुणं मयेति रामभद्रं
केरितिभावः प्रभूतं प्रचुरं प्राज्यमित्यारभ्य स्फीतं भूयश्च भूरि
ाज्ञः कर्मभावोवाराज्यं ब्राह्मणादित्वात् ष्यञ् । स्वाम्यमात
कोशदण्डौ सुहृत्तया । सप्तप्रकृतयोह्येताः सप्तांगं राज्यलक्ष
लक्षणं । स्वयं स्वेन अद्वारकामित्यर्थः । अनुभवत् पालयन्
द्वारेणानुभूतंराज्यं इदानींस्वयमेव अनुभवन्सन्नित्यर्थः ।
ऐश्वर्यसंपन्नः भूम्निमतुप् । रामः दाशरथिः निजां स्वकीयां
अयोध्यानाम्नीं महानगरीं सनाथां नाथवतीं अतनुत अकुरु
पूर्वमप्ययोध्या भरतेन सनाथैव तथापि तस्य नन्दिग्रामप
अनाथेवासीत् इदानीन्तु तत्रैवोषितेनाभिषिक्तेन रामभद्रेण
जातेतिभावः । अत्र श्रीमान्नाम इत्यनेन श्रीमान् स इति प्रथ
विवृत्तं । काव्याद्यन्तश्लोकयोः श्रीमच्छब्दप्रयोगात् मंगल
बोद्धव्यं ॥

द्याशिल्पप्रगुणमतिना वेङ्कटेशेन कृतं
न्ताशाशोल्लिखितमसकृच्छ्रेयसां प्राप्तिहेतुं ।
तारामव्यतिकरसखं हंससन्देशरत्नं
यन्त्वन्तश्चूवणमनघं चक्षुरुज्जीव्य सन्तः ॥ ॥ ५० ॥

परिसमाप्य स्वकीर्त्यनुवृत्तये स्वनामग्रहणपूर्वकं शिष्य
र्पः स्वकाव्यस्य सत्कटाक्षविषयतां प्रार्थयते । विद्येति ।
निवेदाश्चत्वारोमीमांसान्याय विस्तरः । पुराणं धर्मशास्त्रंच
ईश । आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात् । अर्थशास्त्रं
ाद्यष्टादशस्मृता इत्युक्तानां अष्टादशविद्यानां अन्यासाञ्च
ां यत् शिल्पं परिष्करणादिरूपो व्यापारः तदेव शिल्पं
ंकर्म शिल्पंकर्मकलादिक मित्यमरः कलादिकं कर्मशि
ना । वात्स्यायनोक्ताः नृत्तगीताद्याःचतुष्षष्टिर्बाह्यक्रियाः
ाद्याः चतुष्षष्टिराभ्यन्तरक्रियाश्च कला इत्युच्यन्ते । आदि
ादि क्रियाश्चगृह्यन्ते। तादृशं कर्मशिल्पमुच्यत इतिकोशार्थः।
ऋज्वीमतिः यस्य तथोक्तेन । अनेन सर्वास्वपि विद्यासु
रूपानार्जवराहित्यमुक्तं । एतावता काव्यनिर्माणानुकूला
ा सामग्री व्यञ्जिता।इदंच स्वकाव्ये प्रेक्षावतां प्रवृत्त्युत्पाद
तम प्रशंसादोषःशंकनीयः । आञ्जनेयादेरिव प्रशंसाया
नरावण सहस्त्रंमेयुद्धेप्रतिबलं भवेदितिहनूमता अद्यराम
न्तु मम संयुगे इतिरामभद्रेणच आत्मनश्श्लाघितत्वात्
स्वप्रबन्धे निर्दोषत्वगुणवत्त्वादिप्रत्यायनेन । अतएवोक्तं
साचकाव्ये सर्वत्र शस्यते । तदवश्यं प्रशंसेत कविकाव्ये

तणइति । वेंकटेशेन तन्नाम्ना वेदान्ताचार्येणेत्यर्थः । असौना
तिस्त्वंनाम परिकीर्तये दितिवत् स्वनामकीर्तये त्काव्ये कविः व
तण इति विधिबलात् स्वनामग्रहणं कृतं । आत्मनामगुरोर्नामेत
मस्त्वन्यविषयो बोद्धव्यः । कृतं सामान्यतो निष्पादितं सन्दब्धं
। कृतेनसोपानपथेनमञ्च मित्यत्रकृतेन सुविहितेनेतिव्याचरव्यौ
। असकृत् पुनःपुनः चिन्तैव परिष्करणविषयं पर्यालोचनमेवेत्
: रत्नादिनिघर्षणोपलः तेन उल्लिखितं उत्तेजितं परिष्कृतंच। अ
स्य निर्दोषत्वं शोभातिशयश्च व्यज्येते । श्रेयसां कल्याणानां ३
ःय हेतुं कारणं । रत्नमहामणिं यत्नात् श्रेयांसिलभतेनरः। इत्यु
त्नस्य रक्षितस्य श्रेयस्करत्वात् । काव्यस्य भगवद्विषयत्वेन श्रेय
। हेतुर्नाकारणं बीजमित्युक्तेः हेतुशब्दो नियत पुंल्लिगः सी
। तयोर्व्यतिकरः अन्योन्यन्योगः तस्य सखिमित्रं राजाहस्सरि
च् सखिशब्दो वाच्यलिंग इति वदन्ति सीतारामव्यतिकर संप
र्थः । रत्नानामपि केषांचित् विरहिसंयोजन सामर्थ्यमस्ति । के
स विश्लेष विनिवारणा दाक्षिणा इति रत्नशास्त्रोक्तेरिति व्यतिक
त्युक्तं । यद्यपि पूर्वं हंसस्य वार्तानभिज्ञत्वोक्त्या संप्रति संदे
राम व्यतिकरसखत्वमुच्यमानं न संगच्छतइव । यतोव्यतिकरस
सीतयात्मधारणे कृते सतिपश्चात् व्यतिकरसंपादनेनभवति । त
ाति वार्तानभिज्ञस्य सन्देश कथनशक्त्यभावात् तथापि व्यति
शक्ति मत्वमेव तस्य तत्सखत्वमुच्यत इतिनदोषः। अतएव मेघ
देशं जलधरवरो दिव्यवाचाचचक्ष इतिवदत्र हंस आचचक्ष इत
क मितिबोद्धव्यं हंसस्य पक्षिविशेषस्य सन्देशः वाचिककथ

देशः तत्प्रतिपादकं काव्यमपि हंससन्देशः स एवरत्नं महामणि
नास्य काव्यस्य प्रकाशकत्वं मंगळत्वं मान्यत्वं इत्यादयो रत्नध
ते । सन्तः सहृदयास्सज्जनाः गुणानिर्वाहित्वकारस्सन्तस्सत्सुन
त्या तेषामेव गुणग्राहित्वादितिभावः । अत्र यऐकान्त्यंगता
वत्यात्मभावने । ते वैष्णवाभागवतास्सन्तइत्यपितेस्मृता इ
श्रवो ब्रह्मनिष्ठा अपिसच्छब्देन गृह्यन्ते । तेन निवृत्त तर्षैरुपग
[भवौषधाच्छ्रोत्र मनोभिरामात् । इत्युक्त प्रकारेण सर्वैरिदं क
व्यमितिव्यज्यते । श्रवणयोः अन्तश्श्रवणं विभक्त्यर्थेऽव्ययी
यो र्विद्यमान मित्यर्थः अनघं काचकामलादिदोषरहितं अज्ञान
दोषरहितं च । चक्षुः नेत्रेन्द्रियं तत्वेनाध्यवसितं ज्ञानमित्यर्थः च
स्य दृश्यत्वात् तथोक्तिरितिध्येयं। यद्वा श्रवणयोः कर्णशष्कुल्योर्
ः तत्वेनाध्यवसितं श्रोत्रेन्द्रियमित्यर्थः । उज्जीव्य उन्मील्य उद्
गीवयतेर्ल्यप् पश्यन्तु विलोकन्तां शृण्वन्त्वितिभावः । दृशेः प्राश
रित्रोटिपाघ्राध्मेत्यादिना पश्यादेशः अत्र हंसं प्रतिरामेणोक्तस्य
स आचार्य प्रणीत काव्यस्यच वस्तुतो भेदेपि अभेदोपचाराद्वा
ाद्वा अभेदोबोध्यः लोकेपि अर्थैक्यादेव सन्देशहरत्वादि संभव
ः । असतः प्रति यद्वक्तव्यं तदुक्तं हारावळीशेषेपुरुषोत्तमेन । a
ामनन्तत्वात् शब्दादीनां विशेषतः । ककदाकेन किंदृष्टं इति
क्षमः । अतश्शब्दः कदृष्टोयं अर्थत श्चापिकीदृशः । इतिका
ात् मात्सर्यमलिनात्मनामिति । अत्र सन्तस्सम्यक् ज्ञानेन प
ति प्रार्थनयाकाव्यमिदं गुरुतरसरसार्थबहुळमितीतरविलक्ष
वद्विषयतयाच तादृशरासिकतमाभिज्ञ गुरुजन मुखादेव श्रोतव्

इति कवितार्किक सिंहस्य
न्तस्वतन्त्रस्य श्रीमद्वेङ्कटनायस्य वेदान्ताचार्यस्य कृतिषु
हंससंदेशे महाकाव्ये द्वितीय आश्वासः
हरिः ओम्.

अत्र समस्तवस्तुवृत्ति सावयवरूपकं ज्ञानादिरूपंविषयं ष्ठाध्यवसानात् रूपकातिशयोक्त्या उत्थापित मितिसंकरः। कीर्तनमपि मंगळभूयस्त्वायेतिबोद्ध्यं। सतां संकीर्तनाद्ध्या दपिमानवः। व्यपोह्य सकलंपापं सर्वकल्याण मश्नुत इत्युक्तेः। न्तु पूर्वाश्वासान्तएव व्याख्यात मितिसर्वं भद्रम् ॥ ॥ ५० ॥

सुखबोधायबालानां विदुषाञ्चसतांमुदे।
विशदोहंससन्देश प्रकाशोयं मयाकृतः॥
यदत्रस्खलितं किञ्चिदज्ञानात् ज्ञानतोपिवा।
ाच्छतस्खलनंमत्वातत्क्षाम्यन्तु विपश्चितः॥
ारासारविवेकज्ञाः गुणग्रहणतत्पराः।
सिकाबहवस्सन्तीत्येषाव्याख्याकृतामया॥
वेदान्ताचार्य सत्सूक्तिभक्तिप्रचयमूलया।
अनयाव्याख्ययादेवः प्रीयतांपरमः प्रभुः॥
जयतुसुविद्यः सुजनः जयतुचनिगमान्तदेशिकस्योक्तिः।
जयतुचसहृदयलोको जयतुचसीतापतिश्श्रीमान्॥

इति

श्रीमन्नडादूर भिजनस्य मेलप्पाळय मग्रहार निवासस्य

श्रीमद्वात्स्य वरददेशिक तनूभवस्य

श्रीमद्वात्स्य वेदान्तदेशिक चरणारविन्द मधुव्रतस्य

श्रीमन्मुनित्रयसिद्धान्त निर्धारणाचार्य

श्रीनिवास महादेशिककरुणाकटाक्ष लब्धसत्संप्रदायस्य

। चक्रवर्तिनी परितोष प्रतिपादित महामहोपाध्यायपदस्य

नगमान्त महादेशिक निर्व्याज दिव्यकरुणा परिग्राहपात्रस्य

।मदग्न्य वात्स्यस्य श्री. उभय. श्रीरंगराजाचार्यस्य कृतौ

हंससन्देश प्रकाशेद्वितीयः परिच्छेदः.

हरिः ओं श्रियैनमः श्रीमते हयग्रीवायनमः

श्रीमते निगमान्तमहादेशिकायनमः.

श्री रभिवर्धताम्.

गतेषु गाननेमेषु कलेरब्देषुपूर्णताम् ।
हंससन्देश विवृत्तिश्शुभकृत्युदभूदियम् ॥

HAMSA SANDESA,

ENGLISH NOTES & TRANSLATION,

BY

N. V. DESIKA CHARIAR, M. A., B. L.,

AND

G. KASTURI RANGA AIYENGAR, M. A.

n used in this sense the pronoun तद् does no this
elative यत्. Compare तन्वरं वपुषि कुञ्जरं मुखे मन्म
लंमहः—Mallinatha. तत्=प्रसिद्धंमहः The Great Being
the attributes mentioned in the Sloka—तद् is use
sense even without any विशेष्य. Compare सजयति
वा चकास्ति यस्यो मयोक्तयानिहिता। नयनप्रदीपकज्जल जि
जतशुक्तिरिव॥— Subandhu. कामी =one whose desir
back Sita) was intense. कल्प = a day of Brahma cc
of 1000 Deva yugas. Note the Vigraha of कल्पाव
माप is indeclinable meaning 'with great effort'. नि
object of विषेहे =endured the night's suffering. वि
n. Act. Perf. 3rd Pers. Sing of सह् with वि.

Sloka 2. सः सेनां उद्योजयिषन्सन् दूयमानान्तरात
पे कमलसरसि क्रीडाखेलं राजहंसं काल्ये ददर्श ॥

Sri Valmiki describes a lotus tank near the *prasr*
which is otherwise known as a Malyavat hill to
Rama had retired with his brother Lakshmana
installation of Sugriva. The author evidently ha
mind and introduces the subject of the poem by s
at Sri Rama, who was about to advance with
rces towards Lanka aud whose mind was full of g
count af Sita, saw next morning a stately swan p
a certain lotus-tank.

grief n the morning. It governs ददर्श। कपिकुलपति =
n her as=Sugriva. तूर्णं=quickly. उद्योजयिष्यन् is the
